केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः — २१७

वसुमतीचित्रसेनीयम्

अप्पय्यदीक्षितविरचितम् ।

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६५/११४१

मूल्यं रूप्यकत्रयम् ।

INTRODUCTION

The Vasumatīcitrasenīyam a Nāṭaka was first published in instalments in the Quarterly Sanskrit Journal[1] of the Kerala University Manuscripts Library and it is now being issued in book form as No. 217 in the Trivandrum Sanskrit Series. The edition is based on a manuscript (No. 2034) and a transcript (No. 406) of this Library.

The Author:— The author of this drama as we understand from the words[2] of the Sūtradhāra in the prologue, is Appayyadikṣita (III), one of the grandsons of Āccan the brother of the well-known Appayyadīkṣita (I) who has been credited with the authorship of one hundred and above works in Sanskrit. Aufrecht[3] and following him writers like S. S. Subrahmanya Sastri[4] and

---

1. *From Vol. XIII No. 4 to Vol. XV. No. 1*

2. सूत्रधारः— आदिष्टोऽस्मि हालास्यपतिसेवासमागतैः सामाजिकैः । यथा- अस्ति खलु भारद्वाजकुलजलधिकलानिधेः श्रीकण्ठमतप्रतिष्ठापयितुः अप्पय्यदीक्षितस्य पौत्रः कविबुधकण्ठीरवनीलकण्ठमखिसोदर्यतानुगुणसाहितीसम्प्रदायः कविरप्पय्यदीक्षितो नाम । ... ... तेन निर्वर्तितं वसुमतीचित्रसेनीयं नाम नाटकमभिनीयतामिति ।

3. *Catalogus Catalogorum I p. 22 b.*

4. *See "Śivādvaitanirṇaya" - University of Madras. 1930- Introduction p. 14- the works of Appayyadikṣita.*

M. Krishnamachariar[5] who have spoken of the works of Appayyadīkṣita have invariably included this drama with the title 'Vasumatīcitrasenavilāsa' as one of the 104 works of Appayyadīkṣita I. But Dr. V. Raghavan[6] has pointed out this error and he has based his argument on the same passage[7] as we find in the prologue and also on the colophon[8] of the present drama found in a manuscript available in the Bhandarkar Oriental Research Institute, Poona. He has stated that it is a drama not of Appayyadīkṣita I, son of Rangarāja but of Appayyadīkṣita III, son of Nārāyaṇadīkṣita and Bhūmidevi. Appayya I had a brother named Āccan; Āccan had two sons Narayana and Appayya II; Narayana's sons were 1) Āccan, 2) Nīlakaṇṭhadīkṣita the celebrated author of the well-known Nīlakaṇṭhavijayacampu, 3) Appayya III, the present writer also called Ċinna Appayya[9] 4) Chandraśekhara

---

5. *Classical Sanskrit Literature- p. 227.*
6. *See "Appayyadiksita II and III"- Proceedings and Transactions of the Xth All India Oriental Conference 1940- pp. 176- 180.*
7. *See. op. cit.*
8. *The colophon which is missed in our Mss:-*

   इति निष्क्रान्ताः सर्वे । षष्ठोऽङ्कः । इति श्रीमद्भारद्वाजजलधि-कौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुराधिकशतप्रबन्धनिर्वाहधूर्वहमहाव्रतयाजिश्रीमदप्पय्यदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण अप्पय्य-दीक्षितात्मजेन अप्पय्यदीक्षितेन विरचितं वसुमतीचित्रसेनं नाटकं सम्पूर्णम् ।

9. *See also:-*

and 5) Atirātrayajvan. Of them, Cinna Appayya was given in adoption to their junior paternal uncle Appayya II.

Appayya II too was a poet and he has written Duṣyantacarita a Kāvya, Rukmiṇīpariṇayanāṭaka, Alankāratilaka, a rhetoric work and certain other works.[10] He is also credited with the title 'Sarasakavi[11]' (a delightful poet). Thus, we see that the author of this drama belongs to a learned family. He has written the following works besides the Vasumatīcitraseṇīyam.

1.	Tantrasiddhānta dīpikā	— (Mīmāmsa)
2.	Durūhaśikṣā	— (-do-)
3.	Prākṛtamaṇidīpa	— (Prākṛt grammar)

यो नारायणदीक्षितानुजवरो योऽप्पय्यनाम्नाभवद्
दत्तोऽप्पय्यमखिनोऽनुजः कविवरश्चिन्नप्पय्याख्यः सुधीः ।
वीरराघवकृता आच्चादीक्षितावली *verse-119.*

quoted from the article 'Tantrasiddhāntadīpika - by N. Ayyaswami Sastri, Mylapore - J. O. R. Madras - 1928 - Vol: II Part 1. pp. 247 - 250-

10. *Cf.* यस्य दुष्यन्तचरितरुक्मिणीपरिणयालङ्कारतिलकादिकाव्यनाटकालङ्कारप्रबन्धनिर्माता पिता कविरप्पय्यदीक्षितः- *etc. etc.*

See - the prologue of the present drama.

11. *Cf. the statement in the prologue* - 'परिष्टूयते सरसकविरिति' *Also cf. prologue to Nīlakaṇṭhadīkṣita's Nalacarita-*

अस्य खलु पितृव्योऽयमप्पय्यदीक्षितो नाम सरसकवितासाम्राज्यसार्वभौमस्तत्प्रणेता ।

Dr. V. Raghavan[12] has expressed the view that Appayya III is probably the author also of the Citramīmamsā–doṣādhikāra and the Prasiddhasamskāra. The author was patronised by Cinna Bomma, a Poligar under Cokkanātha Nāyak of Madhura whose period is between 1659 and 1682 A. D.[13] and therefore, he may be placed in the middle of the 17th century A. D.

The fact that the author lived in Madhura in South India for sometime and that he wrote the present drama during this period is confirmed by the statement in the prologue – आदिष्टोऽस्मि हालास्यपातिसेवासमागतैः[14] समाजिकैः । Dr. V. Raghavan observes[15] that the last verse of the present work praises Nīlakanthadīkṣita and that it is clear therefore, that the author studied

---

12. *cf. 'Some Appayyadīkṣitas' - Annuls of Oriental Research - Vol. VI Part I, p. 1.*

13. *See 'Some Appayyadiksitas'.*

14. *Also cf. the following stanza quoted by Dr. V. Raghavan in his article 'Appayyadiksitas II and III' from Bhandarkar Institute Manuscript.*

स्वयं प्रसन्नां विरचय्य साहिती-
मतद्विदेऽपि द्रविडार्भकाय यः ।
अदत्त कीर्तिं कविलोकलिप्सितां
तमेव वन्दे हृदि सुन्दरेश्वरम् ।

The names सुन्दरेश्वर *and* हालास्यपति *are referred to Śiva in the Minaksi temple at Madhura.*

15. *cf. the article 'Appayyadiksita II and III'*

under this elder brother. But unfortunately both the manuscript and transcript based on which the present edition is prepared have left out that portion.

The plot:— Vasumatīcitrasenīyam, in five Acts,[16] deals with the love between the king Citrasena and Vasumati, the daughter of Śāntiman, the king of Kaliṅga. It is a light comedy centering round king Citrasena's love for a pretty young face that he chanced to come across. The entire action is connected with his adventures in adding this new discovery to his harem.

The drama opens with a scene in which king Citrasena, during his hunting expedition in the forest, encounters a Niṣādarāja or a king of mountaineers who returns from Kalinga, after assaulting the palace of king Śāntiman. Śāntiman wishing well for his daughter Vasumati, had gone to Prayaga at that time. Taken as a captive the Niṣāda king hands over to Citrasena all the prisoners he had captured from there. Among them, Śāntiman's mother Jvālāvati, his wife, Vasumati his daughter, and her female friend Caturika are included Jvālāvati is related to king Citrasena, she being the eldest sister of Padmāvati, the wife of the king. At first

16. *The colophon (see foot-note No. 8) of the Ms. which Dr. V. Raghavan has referred to, mentions that the drama has six Acts. But the Mss. of the present edition contain five Acts without injuring the body of the plot.*

sight, Citrasena falls in love with Vasumati the princess who reciprocates his love. After a friendly conversation, Citrasena invites them to visit his palace. But Jvālāvati, irritated by the love of the king towards Vasumati, rejects the invitation and starts for Kalinga with her company. Both the king and Vasumati are disappointed with this unfortunate action of Jvālāvati.

Act II presents an interlude in which Sunīti, the minister of Citrasena makes a plan by which the king with his friend Vasantaka (the Vidūṣaka) might go to Kalinga for winning his beloved, under the pretext o conquering an enemy.

In the Act proper, the king and Vasantaka, disguised as an ascetic and his disciple respectively, enter into the Nandana garden of the capital of Kalinga. In order to scare away an evil spirit haunting Vasumati, she is also brought there by Raivataka, the minister of Śāntimān. When the lovers are united in this way, Caturika, the friend of the heroine, recognises the king and conveys that information to the heroine. When all the attendants are left out at the time of charming her with spells and tying on her the mystical diagram etc., the hero approaches the heroine and tells her of his desire to marry her according to the Gāndharva code Meanwhile, Jvālāvati knows the king's secret plan for winning over the princess through a letter sent by Padmāvati, the queen who has understood the infidelity of the king. She therefore, orders the protection of the princess.

Knowing that his secret plan is coming to light, the king hates his unfortunate fate and leaves the garden.

From the interlude of the next Act, we understand that a cave extending from the city of Kalinga upto the Vindhya forest was made by a robber named Malayaketu, a friend of Citrasena and that through the cave Vasumati and her friend Caturika who are asleep in the prison, are brought into the Bakulodyāna, the palace garden of Citrasena.

The king walks in the company of Vidūṣaka to the garden to divert his mind from the pangs of love. Vasumati and Caturika surprised at the manner in which they were brought into the garden, began to fear that it was a plot hatched by the wretched Jvālāvati to kill them secretly. While the heroine afflicted with the sorrow of separation becomes utterly disappointed in the beautiful sarroundings of the garden, Citrasena suddenly approaches his beloved and takes her in his hands. But misfortune follows him even there. The queen Padmāvati and her friend Sūkṣmadarśini, watching the king's movements, appear there. Suddenly the king takes the heroine and leaves for an adjoining arbour, as hinted by Caturika. The queen mistakes Caturika to be Vasumati and puts her along with Vidūṣaka in internment.

Act IV begins with a dialogue between the queen and her friend Sūkṣmadarśini. The queen decides

to give Vasumati to the king as a result of the advice of her friend. She also decides to give her own valuable ornaments to Vasumati and to take Vasumati's ornaments in return in order that the king might know that his beloved had freedom in his queen's harem and be pleased with the information.

The main scene opens with the king entering in a pleasant mood, since he had obtained the company of his beloved. He is also anxious to see his friend Vīdūṣaka and Caturika. Vasantaka then appears and says that he and Caturika have been freed from the prison in the harem. At that time, the queen wearing Caturika's ornaments, appears before the king and the king mistakes her for Caturika in the twilight of the evening. From the words of the king, the queen understands that it is not Vasumati whom she has captured but it is her friend Caturika. Therefore, she also plays a trick on the king in her turn by pretending herself to be Caturika and thereby taking Vasumati into her custody. She then decides to throw her into the Ciñçāvana or the forest of tamarind trees. The king discovers the deceit of the queen when he meets Caturika who comes in immepiately after the exit of the queen.

Citrasena becomes extremely disappointed when he gathers the news of Vasumati's sudden disappearance and Jvālāvati's evil intentions to kill Vasumati in anyway

by appointing a 'Kṛtya' or a destructive female devil. The king then on consultation with his minister Sunīti, comes to understand that the prince Vīrasena fought and won the demons according to Indra's call and that in gratitude to the king, Indra has sent the 'Pratyṅgiras' (an opposite weapon) to destroy the Kṛtya. The king becomes very glad and retires to the harem to impart this glad news of his son's victory to the queen.

In the last act, the terrible 'Kṛtya' attempts, at the risk of her own life, to destroy Vasumati, according to the will of Jvālāvati. The king learns from Caturika that the queen has again decided to restore Vasumati to him as a present for the happy news of her son's victory. But at the same time, he hears from behind the scene, to his utter despair, that some lady has been killed and also he gets the news that Vasumati has disappeared from the Ciñçāvana. The king supposes that it is Vasumati who is reported to be killed. The king and Caturika then go to the 'Ciñçāvana' to see at least the dead body of Vasumati. There, they see a dying female with her wounds covered. The face of the female seems to be Vasumati's. The king begins to lament and is almost insane with grief. Just then the female dies and immediately the Vidūṣaka detects that it is not Vasumati but a 'Piśācika' or a demoness.

The prince Vīrasena appears then and says that the 'Kṛtya' is destroyed by the 'Pratyaṅgiras' appoin-

ted by Devendra. Meanwhile, Śāntimān appeared there along with Vasumati and Jvālāvati and informed Citrasena that while he was obsorbed in penance, a Piśāçikā named 'Karāli' who was angry with him, had entered into Jvālāvati's mind and did all these offences against his wishes. He also said that his minister Raivataka communicated to him the information that Vasumati disappeared from her harem and that, without finding anyother means, he has brought his daughter to him with 'Ākarṣavidyā' or the science of attracting. At last, Śāntimān expresses his great pleasure in giving Vasumati to the king with the consent of the queen Padmāvati and the play ends with this happy scene.

Appayyadīkṣita has succeded in an eminent degree in securing dramatic effectiveness in the presentation of the plot, a creation of his own imagination;[17] but he has derived inspiration for his innovations from other Sanskrit dramas like the Śākuntala and the Ratnāvali. For example, Śāntimān's penance in the play corresponds to Kaṇva's penance in the Śākuntala and the part played by the minister Sunīti in helping the king in his love affairs corresponds to Yougandharāyaṇa's part in the Ratnāvali. So also, the union between the hero and the hero-

---

17. *The plot is invented by the dramatist himself.*
Cf: the words of the Pāripārśvaka in the prologue of this drama :-

'किन्तु अप्रयुक्तपूर्वकमुत्पाद्यवस्तुकं च रूपकमिदम्'।

ine which is brought about ultimately with the consent of the queen herself, resembles Udayana's union with Sāgarika with the consent of the queen Vāsavadatta in the Ratnāvali.

Though this drama belongs to an era in which Sanskrit drama declined, it has a higher order of merit than most plays of the era. The incident of 'Mantravāda' or charming an evil spirit haunting a female, the introduction of 'Kṛtya', the episode of cheating a 'Piśāçika' in the Ciñçāvana and the description of the king's state of insane grief are genuine dramatic innovations of Appayyadīkṣita.

Appayyadīkṣita's style is marked by its simplicity and lucidness and the diction is enchanting. A few examples of his style may be noted.

The king's anxiety about the heroine—

लोलाक्षी कुटिलालका स्मितमुखी ताम्राधरा चेत्यतः
किं चेतस्तव पश्यति स्वयमियं मामित्यतश्चास्ति किम् ।
कैषा कस्य सुता किमर्पितमना: कन्या नवेत्यन्ततः
किं त्वं वेत्सि मुधैव केवलमहो पारिप्लवं वर्तसे ॥

Act I. verse 11

A description of the Vindhya forest—

पृथ्वीमग्नविशालकन्दरकुटीगर्भस्थलीनिर्भर-
क्रीडत्सन्ततगन्धसिन्धुरघटाकोलाहलोल्लासिनः ।

अन्तःस्तम्भितकुम्भसम्भवगतक्रोधाट्टहासा इव
प्रायो भान्ति वनान्तभीमविषमा विन्ध्यस्य पादा गिरेः ॥

Act III. verse 4

Karuṇarasa in the Vipralambha—

सन्तप्तेव मृणालिका रविकरैः शोच्यापि रम्याधिकं
शून्ये सन्ततबाष्पनिर्झरवहोच्छूने वहन्ती दृशौ ।
एकीकृत्य कृतेव कापि विधिना लावण्यदैन्यश्रियौ
सैवेयं मम वल्लभादिशति मां मध्ये सुधाङ्गारयोः ॥

Act III· verse 16

Appayyadīkṣita's prose is also equally remarkable for its diction and the wealth of imageries. The follwing description of a Bakulodyāna given by the Vidūṣaka may be noted—

इत इतो बकुलोद्यानम् । पश्य तावद् वृक्षशिखरनिलीयमान-भ्रमरशुकमयूरपारावतप्रमुखविविधविहगकुलप्रतिबिम्बसम्बन्धरम्यतया स्फटिकैकनिर्वर्तितमप्यालवालकुट्टिमं वज्रवैडूर्यमुखनवरत्नकल्पितमिव लक्ष्यते । P. 34.

Sri. A. Ramachandra Sastri, Research Offlcer, M. Madhavan Unni, Assistant Research Officer and E. Easwaran Namboodiri, Assistant Research Officer of this Library have helped me in the publication of this work.

Trivandrum
6 - 10 - 1965.

K. Raghavan Pillai.
CURATOR.

॥ श्री ॥

॥ वसुमतीचित्रसेनीयम् ॥

अप्पय्यदीक्षितविरचितम् ।

प्रथमोऽङ्कः

यत्नेनापि समीक्षितं न जगतां मूलेन कोलेन य-
द्यत्तत्त्वं निगमास्त्रयोऽपि न परिच्छिन्दन्ति शक्त्या स्वया ।
आबालं भवति स्फुटं तदपि यद्भक्त्या कियत्यापि त-
न्निर्द्वन्द्वं पुरशासनस्य चरणद्वन्द्वं सदा चिन्त्यताम् ॥ १ ॥

किञ्च,

यत्र स्थावरजङ्गमात्मकमिदं त्रैलोक्यमालोक्यते
प्राप्ता यन्मुखनिर्गता श्रुतिरपि प्रामाण्यकोटिं पराम् ।
यस्यांशावतरा जयन्ति जगतीरक्षादिदीक्षाभृतः
स्वान्ते चिन्तयत स्वतन्त्रविभवं साम्बं परं ब्रह्म तत् ॥ २ ॥

वृत्तेन विस्माययते जगन्ति रामाय तस्मै रचितः प्रणामः ।
यत्नेन पूर्वैः कृतमम्बुराशिं यः पूरयन्नश्मभिराप कीर्तिम् ॥ ३ ॥

---

१. 'परब्रह्म' क.   २. 'विहितः' ख.

[नान्द्यन्ते सूत्रधारः नेपथ्याभिमुखमवलोक्य]

मारिष ! इतस्तावत् ।

[प्रविश्य]

पारिपार्श्विकः— भाव ! अयमस्मि ।

सूत्रधारः— आदिष्टोऽस्मि हालास्यपतिसेवासमागतैः सामाजिकैः । यथा– अस्ति खलु भारद्वाजकुलजलधिकलानिधेः श्रीकण्ठमतप्रतिष्ठापयितुः अप्पय्यदीक्षितस्य पौत्रः कविबुधकण्ठीरवनीलकण्ठमखिसोदर्यतानुगुणसाहितीसम्प्रदायः कविरप्पय्यदीक्षितो नाम । यस्य दुष्यन्तचरितरुक्मिणीपरिणयालङ्कारतिलकादिकाव्यनाटकालङ्कारप्रबन्धनिर्माता पिता कविरप्पय्यदीक्षितः परिष्टूयते सरसकविरिति सर्वलोकैः, तेन निर्वर्तितं वसुमतीचित्रसेनीयं नाम नाटकमभिनीयतामिति ।

पारिपार्श्विकः— [सहर्षं] भाव ! दिष्ट्या वर्धामहे । यदनुगृह्णन्त्यार्यमिश्रा रसवन्नाटकप्रयोगनियोगेन । किन्तु अप्रयुक्तपूर्वमुत्पाद्यवस्तुकं च रूपकमिदम् । तदग्रमादाय स्वर्णिकासु विभज्य विनियोज्यतां पात्रवर्गः ।

सूत्रधारः— [सशिरःकम्पं] एवमेतत् । मारिष ! रङ्गकेतुस्तावत् कथानेतुश्चित्रसेनस्य भूमिकामादत्ताम् । तदमात्यस्य सुनीतेरहमेव । भगिनी पुनरनङ्गलता कलिङ्गपतेः शान्तिसतो राज्ञस्तत्प्रसूतेर्वसुमत्याश्च कथानायिकाया भूमिकां सम्पादयिष्यति ।

---

१. 'भर' क. २. 'अप्पय' क.
३. 'रप्पय' क. ४. 'दुष्यन्त' ख. ५. 'रप्पय' क.

[नेपथ्ये]

आयुष्मन्नितो दीयतां दृष्टिः । कथमत्युद्धता विकोशकरालकरवाल-भीषणा वाहिनी पश्चिमेन पथा परापतति ।

सूत्रधारः -- [कर्णं दत्त्वा] आः ! कथमस्मन्नियोगसमनन्तर-मेव मृगयाप्रसक्तस्य राज्ञो भूमिकामादाय रङ्गमण्डपं प्रविशति मे भावः ।

पारिपार्श्विकः — अहमपि कलिङ्गेभ्यः प्रतिनिवर्तमानस्य राज गृहावस्कन्दिनश्चोरसैन्यस्य प्रत्यनन्तरो भवामि ।

[इति निष्क्रान्तौ ।]

प्रस्तावना ।

[ततः प्रविशति यथानिर्दिष्टो राजा रथेन सूतो विभवतश्च परिवारः आभिमुख्येन ससैन्यो निषादराजश्च ।]

राजा— सुनीते ! पश्चिमे किमेतत् ।

सुनीतिः — एते किल विलक्षणग्रथितमौलयो विपुलहेतयो रथ-कुञ्जरवाधवर्जिताः पदातितुरगप्रायाश्चोरा इति व्यक्तमेव, यदस्मच्चमू-मवलोक्य क्षणमात्रस्तब्धचाराः संज्ञया दूरगतानानाय्य सङ्घीभवन्ति । तन्मन्ये कुतोऽप्यवस्कन्द्य प्रतिनिवर्तन्ते ।

राजा— एवमेतत् । यतः,

उत्सिक्तद्विपदसृगक्तरक्तखड्ग-
प्रग्राहद्विगुणविभीषणाग्रहस्ताः ।
स्वानश्वान् बहुधनभारभङ्गुराङ्गान्
निश्शब्दास्त्वरितपदं प्रतो(लीद)यन्ति ॥ ४ ॥

अपि च,

प्रत्येकप्रतिगतपञ्चषावरोधान्
बाह्लीकान् स्वयमवरुह्य पादचाराः ।
कर्षन्ति प्रसभमितः खलीनहस्ताः
सम्मोदद्विगुणितपौरुषा निषादाः ॥ ५ ॥

सुनीतिः— हन्त! निमेषमात्र एवाभिवर्तते समन्ततो युगान्त-क्षुभितसप्तार्णवीगभीरभीषणः शबरसेनासम्पातः । तदस्य निग्रहाय सेनापतिश्चण्डबाहुस्तावदाज्ञप्यतां देवेन ।

राजा— किमनपकारिषु वीर्यप्रकर्षमात्रेण चित्रसेनः प्रगल्भते ।

सुनीतिः— मैवमाज्ञापयतु देवः ।

कर्कशक्रकचकर्तनत्रुटद्वक्रनर्तितमृगैकभोजिनः ।
निर्निमित्तपरवित्तगृध्नवः किं न हन्तुमुचिता महीभुजाम् ॥ ६ ॥

राजा— तर्हि परिवीयन्तां शबराः ।

चण्डबाहुः— यदाज्ञापयति देवः । [इति स्वजनमादिशति । परिजनस्तथा करोति ।]

---

१. 'वर्ग' ख.

निषादराजः— [उपसृत्य] किं अहं एव्व निलुंधीएमि । किं ति शुहप्पशु(त्ताए?त्तस्स)मअला(याए?यस्स) पबोहणं कळेशि । (किमह-मेव निरुध्ये । किमिति सुखप्रसुप्तस्य मृगराजस्य प्रबोधनं करोषि ।)

सुनीतिः— त्वं खलु मृगराजोऽसि । तत्रापि चित्रसेनस्य ।

राजा— अपरिचितलोकतन्त्रा प्रसुप्तविद्रुतमृगव्यथनमात्रशूर-मानिनी नित्योद्धता खलु शबरजातिः ।

निषादराजः— कअं कअं यादिवण्णणेण । णहि कण्णआओ दीयंति । किं ति शदंतचाळं अवस्कंदिअ पडिणिवट्टमाणा अहगे णिळुद्धा । (कृतं कृतं जातिवर्णनेन । नहि कन्यका दीयन्ते । किमिति सदन्तचालम् अवस्कन्द्य प्रतिनिवर्तमाना वयं निरुद्धाः ।)

सुनीतिः— अवस्कन्द्य प्रतिनिवर्तमाना इत्येव ।

निषादराजः— णं वुत्ती खु चोळिआ चिळादाणं । (ननु वृत्तिः खलु चौरिका किरातानाम् ।)

सुनीतिः— तर्हि जात्यैव निरोधनीयाः ।

निषादराजः— शावि ण तुह्माणं विशयेशु । (सापि न युष्माकं विषयेषु ।)

सुनीतिः— क्वान्यत्र ।

निषादराजः— कलिंगळा(आए?अस्स) शंतिमं(ताए?तस्स) णय-रम्मि । (कलिङ्गराजस्य शान्तिमतो नगरे ।)

चण्डबाहुः— [ससम्भ्रमं] नन्वकार्यज्ञ पुरुषाधम ! किमात्थ रे किमात्थ देवीभागिनेयं कलिङ्गेश्वरमपि हारितपुरम् ।

---

१. 'यळीम्म' ख

नन्वद्यैव मदान्धसिन्धुरशिरस्सञ्चारिपञ्चानन-
क्रोधोद्घाटितवक्त्रगर्तविकटज्यानद्धचापे मयि ।
नष्टः स्याः शरकृत्तकण्ठकुहरप्रोद्गच्छदुद्बुद-
स्रोतोवाहिघनास्रविस्रकरणो नापैषि चेत् सङ्गरात् ॥ ७ ॥

तदभ्येहि सङ्गराय । [इत्युद्धतं परिक्रामति ।]

निषादराजः - [सभयं] पच्चप्पीअदि हारिदं । परित्तायदु परित्तायदु । [इति राजपादयोः पतति ।] (प्रत्यर्प्यते हारितम् । परित्रायतां परित्रायताम् ।)

राजा— मा भैषीः । उत्थीयताम् ।

सुनीतिः— हारितवस्तुनिरीक्षणाय विस्तारिसुरभिशीतलं माकन्दमूलं परिष्करोतु देवः ।

[राजा नाट्येन रथादवरुह्य तथा करोति ।]

निषादराजः— भो भो अह्मकेळा उपहळह । (भो भो अस्मदीयाः! उपहरथ ।)

राजा— [भुजस्पन्दमभिनीय स्वगतम्] कृतानतावपि वैरिणि किमिति दक्षिणो भुजः स्पन्दते । आचक्षते हि शाकुनिका ईदृशेषु निमित्तेषु समुपनतान्यभिलषितानि । तत् किमिदानीं भवेत् ।

निषादराजः— इमा अतिसइअणंदअचंदहाशा हेदओ । इमाइ पूरिअओअणाआमवित्थारभूमंडलाइ वशूइ । इमे अ वळज्झा हिआ तुळआ । (इमा अतिशयितनन्दकचन्द्रहासा हेतयः । इमानि पूरितयोजनायामविस्तारभूमण्डलानि वसूनि । इमे च वलक्षा हितास्तुरगाः ।)

राजा— [आत्मगतम्] किमिदमेव फलमतिशायितपुरन्दरसम्पदो ममापि भुजस्पन्दस्य ।

निषादराजः— उवशप्पह ळाअमहिळा। (उपसर्पथ राजमहिलाः !।)

तास्वेका— हळा चउरिए दाणिं केण हरिआमो । साज्झसादो दट्ठुं ण पारेमि । (हला चतुरिके! इदानीं केन ह्रियामहे । साध्वसाद् द्रष्टुं न पारयामि ।

अन्या — हळा वसुमइ! मा भआहि । मा भआहि । एदिणा क्खु महाराएण पोमावईवइणा रक्खिस्सामो। (हला वसुमति! मा भैषीः। मा भैषीः। अनेन खलु महाराजेन पद्मावतीपतिना रक्षिष्यामहे ।)

वसुमती— [निर्वर्ण्य सविस्मयमपवार्य] धण्णा पोमावई। अयि चउरिए! णं पुळोएसु । (धन्या पद्मावती । अयि चतुरिके ननु पश्य ।)

किमुचिअविणिवेसो तुळ्ळवत्थूण ळोए
किमु तिहुवणणेत्ताणंदसाराण रासी ।
अहव सहइ रूपं धीरमाहप्पपुण्णं
जुवइहिअसरण्णं तेजसुंदेरमेत्तं ॥ ८ ॥

(किमुचितविनिवेशस्तुल्यवस्तूनां लोके
किमु त्रिभुवननेत्रानन्दसाराणां राशिः ।
अथवा शोभते रूपं धैर्यमाहात्म्यपूर्णं
युवतिहृच्छरण्यं तेजस्सौन्दर्यमात्रम् ॥)

[सर्वा उपसृत्य] जेउ जेउ महाराओ । (जयतु जयतु महाराजः ।)

राजा— कथं देव्याः पद्मावत्या भगिन्यपि ज्वालावती बन्दीकृता। (सबहुमानं) उपविशन्त्वत्रैव भवत्यः ।

[सर्वा उपविशन्ति ।]

राजा— (स्वगतं । वसुमतीं निर्वर्ण्य) किमेतावदपि फलं भुजस्पन्दस्य । पर्याप्तमधिकं वा फलम् । कियदिवोपकृतं शबरैः । अहो ! न खलु मनोरथस्याप्यभूमिराभिरूप्यमेतस्याः । स्थाने यदिमामवलोकयतोऽपि मम चिरपरिशीलितमपि धैर्यमवधीर्य परिप्लवते हृदयम् ।

यदि विधुरधरोत्तरोऽभविष्य-
च्छरदि निकामकठोरमण्डलश्रीः ।
अथ कथमपि साम्यमाश्रयिष्य-
ल्ललितकलांशमृते मुखेन तन्व्याः ॥ ९ ॥

करचरणदृगाद्यं सद्वितीयं यदस्या
भवति वपुषि किञ्चित् तन्मिथः साम्यमेति ।
यदपि सुवदनाया वक्त्रमेकं सुवृत्तं
तदपि वहति हन्त स्वानुबिम्बेन साम्यम् ॥ १० ॥

लोलाक्षी कुटिलालका स्मितमुखी ताम्राधरा चेत्यतः
किं चेतस्तव पश्यति स्वयमियं सामित्यतश्चास्ति किम् ।
कैषा कस्य सुता किमर्पितमनाः कन्या न वेत्यन्ततः
किं त्वं वेत्सि मुधैव केवलमहो पारिप्लवं वर्तसे ॥ ११ ॥

कृतं कृतमसम्भावितोदर्कदुरन्तया चिन्तया । (प्रकाशम्) महत् किलाहितमत्याहितं भवतीनां दैवदुर्विलसितेन ।

ज्वालावती— ण किं वि णो अच्चाहिअं दीसमाणेसु तुम्हेसु । (न किमपि नोऽत्याहितं पश्यत्सु कारुणिकेषु युष्मासु ।)

राजा— किमात्मजनभरणमात्रेण कारुणिकता । अप्यत्याहितमखिलस्यापि जनपदस्य ।

ज्वालावती— राअभवणमेत्ते । (राजभवनमात्रे ।)

राजा— (स्वगतं) चेतः! समाश्वसिहि समाश्वसिहि । (प्रकाशं) कष्टं कष्टं! अपि सर्वा इमा राजभवनगोचराः ।

ज्वालावती— णहि णवर राअभवणगोअरमेत्ता, इमा एव्व मह सुण्हा । [इति ता हस्तेन निर्दिश्य, वसुमतीं निर्दिशन्ती] इयञ्च [इत्यर्धोक्ते]

(नहि केवलं राजभवनगोचरमात्रा । इयमेव मम स्नुषा ।)

राजा— (स्वगतं) सत्यं सांशयिका मम प्राणाः ।

ज्वालावती— ताए पसूई वसुमई । (तस्याः प्रसूतिर्वसुमती ।)

राजा— [स्वगतं] कथमियं क्षत्रिया । कथं च तत्रापि शान्तिमत एव । [सविमर्शं] हृदय! कथमाकाण्डताण्डवमारभसे । ननु च प्रसूतिरित्युदासीनोपन्यासः ऊढा न वेति संशाययति । (चिन्तयंस्थितः ।)

ज्वालावती— किं चिंतयंतो विअ आवुत्तो दीसइ । (किं चिन्तयन्निवावुत्तो दृश्यते ।)

राजा— (स्वगतं) किं प्रपत्स्ये । भवत्वेवम् । (प्रकाशं) एवंगतेऽत्र प्रियवयस्यं शान्तिमन्तमुद्दिश्य प्रष्टुमपि कुशलं बिभेमि ।

ज्वालावती— आवुत्त! मा भआहि । मा भआहि । (आवुत्त! मा भैषीः । मा भैषीः ।)

राजा— जीवामि । जीवामि । क्व नु किं करोति मेतर्हि प्रियवयस्यः ।

---

१. 'ज्वालावती–किमुचितपसूई' क.

ज्वालावती— वसुमईं उद्दिसिअ पआगे तवं चरइ। (वसुमतीमुद्दिश्य प्रयागे तपश्चरति।)

राजा — (स्वगतं) अपि नाम वरनिमित्तमेव स्यात्। (प्रकाशं) अपि ज्ञायते निमित्तमपि। [वसुमतीं साकूतं पश्यंस्थितः।]

ज्वालावती— (स्वगतं) कहं एदं एव्वं इमाए आहिणिविट्ठो धुत्तो पुच्छइ। किं पोम्मावईरमणस्स भणिस्सं। अहव पच्चग्गोवआरिणो छादइस्सं। (कथमिदमेवमस्यामभिनिविष्टो धूर्तः पृच्छति। किं पद्मावतीरमणस्य भणिष्यामि। अथवा प्रत्यग्रोपकारिणः छादयिष्यामि।)

चतुरिका— एदं वि पुच्छीअदि। किं अण्णं कण्णआपिअराणं (एतदपि पृच्छयते। किमन्यत् कन्यकापितॄणाम्।)

राजा— (स्वगतम्) स्पष्टमाह वरनिमित्तमिति।

[ज्वालावती तामपाङ्गेन तर्जयति। मातरः ज्वालवतीं दृष्ट्वा निर्वेदं नाटयन्ति।]

राजा— (स्वगतं तां वीक्ष्य) महानयमुपघ्नो मनोरथलतायाः। [सहर्षं] कथमुत्सवपरम्परेव मामुपनमति। एष मथितादर्णवात् प्रथमं पारिजातस्य पारिजातमनु कामधेनोः कामधेनुमनु श्रियः श्रियमनु सुधायाः इति प्रादुर्भावः। किन्तु ज्वालावतीति महानयमन्तरायः।

अङ्के निवेश्य सुदृढं परिरभ्य चेय-
मुन्नाम्य चाननमथोत्पुलके कपोले।
आघ्राय चुम्बितचरी ननु चाभविष्य-
ज्ज्वालावतीह जरती यदि नागमिष्यत्॥ १२॥

[उत्पुलके स्थितः।]

वसुमती— [राजानं निर्वर्ण्य स्वगतं] अवि णाम मं विअ एदं वि वम्महो आआसेइ । (अपि नाम मामिवेममपि मन्मथ आयासयाति ।)

राजा — [वसुमतीं वीक्ष्य स्वगतं] सर्वथा कृतार्थोऽस्मि यन्मयि सानुरागा । कुतः,

पश्यति किल मयि बालां भाववती वा न वेति निर्णेतुम् ।
सातङ्कमक्षिवलनं मद्गतमेषा निवर्तयति ॥ १३ ॥

तदमूं नावलोकयामि । इयमेव सुखमवलोकयतामबला । अथवा,

एषा विलोकयतु मामिति तामपश्यन्
किं व्यर्थयामि सुतरां तृषिते दृशौ मे ।

[पुनस्सविमर्शं]

हन्त भ्रमोऽयमियमेव निरीक्षतां मां
सर्वं वपुर्मम तदा हि भवेत् कृतार्थम् ॥ १४ ॥

हन्तेयं मिलतु न वा मया मृगाक्षी
नैतावद् व्रजति मनोरथोऽप्युदग्रः ।
यन्नीषत्प्रणयवतीव तेन धत्ते
साफल्यं मम जननं च जीवितं च ॥ १५ ॥

[सहर्षोन्मादं स्थितः ।]

मातरः— [राजानं वसुमतीं चावलोक्य स्वगतं] अवि णाम एदाणं पच्चग्गजळहरजळसेअकुम्मळिअकदंबविडंबणिज्जा अण्णोण्णसरिससंगमसंतुट्ठउभअसुंदेरलच्छमुत्तआणंदबाहसळिळायन्तसेदबिंदुसुंदराओ आकिदीओ इमाए पिउणो चिरतवपरिस्संतस्स मणरहं पूरेंति । [विमृश्य] का

पसत्ती एत्तिअस्स सोभग्गस्स जाआबहिणिमेत्तबंधु जालावई अज्जू ।

(अपि नामैतयोः प्रत्यग्रजलधरजलसेककुड्मलितकदम्बविडम्बनीयान्यो-न्यसदृशसङ्गमसन्तुष्टोभयसौन्दर्यलब्धमूर्तकानन्दबाष्पसलिलायमानस्वेदोबिन्दु-सुन्दरे आकृती अस्याः पितुः चिरतपःपरिश्रान्तस्य मनोरथं पूरयतः । का प्रसक्तिरेतावतः सौभाग्यस्य । जायाभगिनीमात्रबन्धुर्ज्वालावती आर्या ।)

ज्वालावती— [स्वगतं] हद्धि हद्धि । केत्तिओ से धुत्तस्स पोमावइं उज्झिअ इमाए अहिणिवेसो । एव्वं होदु । (प्रकाशं) अय्य महाभाअ! रेक्खिआ अह्मे अणुमण्णेहि दाव अह्मकेरणअरगमणस्स । (हा धिक् । हा धिक् । कीदृशोऽस्य धूर्तस्य पद्मावतीं त्यक्त्वा अस्यामभि-निवेशः । एवं भवतु । आर्य महाभाग! रक्षिता अस्मान् अनुमन्यस्व ताव-दस्मन्नगरगमनाय ।)

वसुमती— [स्वगतं] आसीदइ असणिपाओ । (आसीदत्य-शनिपातः ।)

चतुरिका— [स्वगतं] किं अय्यो भणिस्सदि ।

(किमार्यो भणिष्यति ।)

राजा— [स्वगतं] हा हतोऽस्मि धैर्यविलयप्रकटितमनोवृत्ति-र्मन्दभाग्यः ।

उद्घाट्य हृदयग्रन्थिमुज्जिहानेन मे बहिः ।
आनन्देनैव खिन्नोऽहमनुदकव्यपेक्षिणा ॥१६॥

एवं वा भवेत् । [प्रकाशं] ननु चिरंदिदृक्षुर्भगिनी संभावयितव्या भवत्या । तदन्वेतु सपरिवारा माम् भवती ।

---

१. 'चिरं दि' ख.

चतुरिका— [स्वगतं] जुत्तं उववण्णिअं पडिभाए रागस्स अ । (युक्तमुपवर्णितं प्रतिभाया रागस्य च ।)

वसुमती— [स्वगतं] एत्तिअं एव्व एदिणा भणिदव्वं । अदो वरं जाळावईए वअणम्मि मह जीविदं अण्णं वा । (एतावदेवानेन भणितव्यम् । अतः परं ज्वालावत्या वचने मम जीवितमन्यद्वा ।)

ज्वालावती— अय्य सव्वण्णो खु भवं । जह णिमित्तंतरणिग्गदा बहिणिं दट्ठूण विसअं आगदुअ ण दिट्ठवदि त्ति उवाळंभणिज्जा ण होमि तह इमा सं णअरं पवासिअ अहं एव्व झत्ति पडिणिवट्टेमि (आर्य! सर्वज्ञः खलु भवान् । यथा निमित्तान्तरनिर्गता भगिनीं द्रष्टुं विषयमागत्य न दृष्टवतीति उपालम्भनीया न भवामि तथा इमाः स्वं नगरं प्रवेश्याहमेव झटिति प्रतिनिवर्ते ।)

[वसुमती सातङ्कं राजानमवलोकते ।]

राजा— अनुमन्तुं न पारयामि ।

ज्वालावती— (स्वगतम्) बळिअं खु अहिणिवेसो इमाए । (प्रकाशं) केत्तिअं सोहद्दं अह्मसु । (उत्थाय) जेउ महाराओ । अणुमदं हि एव्वं एव्व वच्छळाणं वाआ होदि । [सपरिवारा निष्क्रान्ता ।] (बलीयान् खल्वभिनिवेश अस्याम् । कियत् सौहार्दमस्मासु । जयतु महाराजः । अनुमतं हि । एवमेव वत्सलानां वाग् भवति ।)

वसुमती (सखीहस्तमवलम्ब्य सास्रं अपवार्य) एत्तिअं णिम्माणफळं मह चक्खूण । अहव मह एव्व । [इति परिवृत्य पश्यन्ती निष्क्रान्ता ।] (एतावन्निर्माणफलं मम चक्षुषाः । अथवा ममैव ।)

राजा (स्वगतं) हन्त कथं फलितम् ।

अयि बत गतैव रभसादाविष्टेवाशयेऽपि शोच्येयम् ।
अथवा भगिनीस्नेहात् पौत्रीमपनयति मम समीपगताम् ॥१७॥

मायां कामपि मन्मथः प्रकटयन् सर्वेन्द्रियाह्लादिनीं
सान्द्रानन्दमये मनश्च सरसि क्षिप्त्वा स्वयं मज्जयन् ।
आश्चर्यस्तिमिते पुनर्मयि ततः स्वैरं किमप्याचरन्
किं वक्ष्ये पुनरङ्गमङ्गमनलज्वालाभिरासिञ्चति ॥१८॥

(विलक्षस्तिष्ठति ।)

सुनीतिः— (स्वगतं) बलवत् परिक्लिश्यते विरहेण । तदमुं नगरमेव प्रवेशयामि । (प्रकाशं) बलवत् परिश्राम्यति सन्ततमृगयाविनोदेन देवः ।

राजा— सम्यगुपलक्षितं भवता । तेन हि नगरं प्रविशामः ।

चण्डबाहुः— (अपवार्य) चोरेषु किं करणीयम् ।

सुनीतिः— (अपवार्य) नायमवसरो देवाय विज्ञापयितुम् । तत् त्वयैव कारागृहे निरुध्यन्ताम् ।

(इति निष्क्रान्ताः सर्वे ।)

प्रथमोऽङ्कः ।

---

१. ' दाविष्टेव ' क.

द्वितीयोऽङ्कः ।

[ततः प्रविशति सुनीतिः ।]

सुनीतिः — [सविस्मयम्] अम्भसि प्लवन्ते ग्रावाणः । अवाचीनं ज्वलत्यनलः । आलोक्यते च तलं जलधेः । यदेष महानुभावो देवोऽपि पञ्चशरेण वञ्च्यते । अथवा न वञ्च्यते । महिमैष परं महिलासौन्दर्यस्य ।

सर्वाङ्गीणममीलनं च मघवा भेजे सहस्रं दृशां
धाता विभ्रमगर्भमैक्षत दृशा जीर्णोऽप्युदीर्णस्मरः ।
देवोऽपि स्मरशासनः स भगवान् पञ्चाननत्वं दधे
द्रष्टुं नाम तिलोत्तमामपि पुरा स्वर्वारवामभ्रुवम् ॥ १ ॥

तानपेक्ष्य तु निर्विकारो धीरो देवः । किन्त्वयमपि किञ्चित् प्रमाद्यति । यदनुक्तपूर्वमुत्स्वप्नभाषितेऽप्यसदृशमात्मनो मिथ्यावचनं देवीमतिसन्धातुकामो धावकमुखेन मां वाचयति । आस्तामेतत् । कः कोऽत्र भोः ! ।

[1][प्रविश्य]

कञ्चुकी — आज्ञापयत्वार्यः ।

सुनीतिः — मद्वचनाज्झटिति विज्ञाप्यतामन्तःपुरगतो देवः ।

---

1. 'क्तपरुषमुत्स्वम' ख.

कालस्कन्धाभमन्धं तिमिरमिह दिशां चक्रमाक्रामति द्रा-
गुन्निद्रत्रस्तदूरद्रुतपथिविचरद्भिल्लभल्लूकडिम्भाः ।
घन्यामासाद्य पद्यामनभिहतनिजातोद्यमघोपयाता
भिन्दन्त्याहत्य रुन्धन्ति च पुरमरयो दन्तिभिस्त्यक्तघण्टैः ॥ २ ॥

तदहं सेनासनाथः पुरं परिपालयामि । अनन्यजनसुसाधे रिपुसैन्यवधे तु निश्चितजयलक्ष्मीसहायः प्रतिष्ठतां देवो विजयायेति ।

कञ्चुकी— यदाज्ञापयत्यार्यः । [त्वरितं निष्क्रान्तः ।]

सुनीतिः— व्याघ्रचर्मविभूत्यादिसम्भरणाय धावकमादिशामि । [इति निष्क्रान्तः ।]

शुद्धविष्कम्भः ।

[ततः प्रविशति योगिवेषो राजा विदूषकश्च ।]

विदूषकः— [राजानं विलोक्य] एदिणा तुह भप्पवाघचम्मादि-परिग्गहेण पच्चक्खीकिदो मए महादेवो । (एतेन तव भस्मव्याघ्रचर्मादि-परिग्रहेण प्रत्यक्षीकृतो मया महादेवः ।)

राजा— कथमेष सात्त्विकवेषस्त्वां विलोभयतु ।

विदूषकः— सच्चं अणप्प(ण्णू?ण्णो) तुमं । किं भणामि एत्तिअं ति तुह रूवं । सा एव्व णाअरिआ एदं तुह रूवं दट्ठूण पुरूवदिट्ठे तुह सिंगाररूवम्मि वि णिरवेक्खा होज्ज । (सत्यमनात्मज्ञस्त्वम् । किं

भणामि ईदृशमिति तव रूपम्। सा एव नागरिका एतत्तव रूपं दृष्ट्वा पूर्वदृष्टे तव भृङ्गाररूपेऽपि निरपेक्षा भविष्यति।)

राजा— आवेदय पन्थानम्।

विदूषकः— इदो इदो कलिंगणअरबहिरुज्जाणं णंदणं णाम। (इत इतः कलिङ्गनगरबहिरुद्यानं नन्दनं नाम।)

राजा — अत्रैव कङ्केलितरुमूले मुहूर्तमास्महे। [उपविश्य समन्तादवलोक्य] नन्दनमिति सत्यमेतत्।

पश्यैतः श्रुतिसम्पुटी कलरवैराप्लावयन्ते पिकाः
सन्तप्तं सुखयन्ति गात्रमपि मे मन्दा वनान्तानिलाः।
दृश्यन्ते परितो विविक्तमधुराः शीता लतामण्डपाः
साप्यत्रैव समेति चेद्विरहिणा स्थाने मया जीवितम्॥ ३॥

विदूषकः — जहाचिंतिदं साधेमि। एत्थ दाव तुह्मेहिं इसिहिं विअ शिवाणुज्झाणणिट्ठेहिं होदव्वं। (यथाचिन्तितं साधयामि। अत्र तावद् युष्माभिः ऋषिभिरिव शिवानुध्याननिष्ठैर्भवितव्यम्।)

राजा— दुष्करमेतत्।

यावन्मनो मकुटमण्डनमिन्दुखण्डं
यत्नान्नये करकुरङ्गशिशुं च शम्भोः।
आदिष्टमार्गमिव तावदधीरदृष्टे-
र्निर्यत्नमेति निटिलं च विलोचनं च॥ ४॥

विदूषकः— [विहस्य] चिट्ठदु जं किंपि सुमरंतो भवं। बहिराडंबरमेत्तेण आदिसंधीअदि लोओ। गीत्तक्खलणेण दु ण होदव्वं।

तिष्ठतु यत्किमपि सारन् भवान् । बहिराडम्बरमात्रेणातिसन्धीयते लोकः । गोत्रस्खलनेन तु न भवितव्यम् ।)

राजा— एतावदभिहितोऽस्मि । त्वरतां भवान् ।

विदूषकः— जं भवं आणवेदि । (यद्भवानाज्ञापयति ।)

[इति निष्क्रान्तः ।]

[नेपथ्ये]

पन्थानः सिक्तसम्मृष्टाः परितो विजनीकृताः ।
नारीजनपरीवारा कुमारी यातु नन्दनम् ॥ ५ ॥

[ततः प्रविशति सपरिवारा वसुमती ।]

वसुमती— सहि तदो[1] । (सखि! ततः ।)

चतुरिका— तह मंतिणा रेवदएण विण्णत्ता जाळावई । णंदणवणवासिणो भद्दाणंदस्स जोइणो सआसं तुमं पेसेइ । (तथा मन्त्रिणा रैवतकेन विज्ञप्ता ज्वालावती । नन्दनवनवासिनो भद्रानन्दस्य योगिनः सकाशं त्वं प्रेष्येति ।)

वसुमती— एसो खु भूदो केण वि ण परिहरीअदि । पसुत्तो खु बोधीअदि ण उण पउत्थो । (एष खलु भूतः केनापि न परिह्रियते । प्रसुप्तः खलु बोध्यते न पुनः प्रबुद्धः ।)

चतुरिका— जहपुरुवं णच्चइ हदासा । (यथापूर्वं नृत्यति हताशा ।)

---

१. 'तदो । सहि तदो' ।

वसुमती — [सास्रं] केत्तिअं कालं जीविअभारं धारेमि । एव्वं एव्व पंचमं वि मे दिणं (पुढ़ीवुत्तं) (कियन्तं कालं जीवितभारं धारयामि । एवमेव पञ्चममपि मे दिनं वृत्तम् ।)

चतुरिका— सहि! मा खिज्जं । मा खिज्ज । वीसासबद्धफळाणि णाम देवब्बह्मणवअणाणि । (सखि! मा खिद्य । मा खिद्य । विश्वास-बद्धफलानि नाम देवब्राह्मणवचनानि ।)

वसुमती— किं विळंबीअदि रेवदओ । (किं विलम्बते रैवतकः ।)

[ततः प्रविशति रैवतको विदूषकश्च ।]

रैवतकः— [उपसृत्य] वसुमति भर्तृदारिके! निकषैव योगिनं प्रतिच्छन्नया त्वया क्षणं विलम्ब्यतां यावद् भद्रानन्दमुपगम्य भवती-रानयामि । [स्त्रियः उपविशन्ति ।]

रैवतकः— [परिक्रामन्] महर्षिशिष्य! श्वेतकेतो! सुप्रभातमद्य। यदालोकयन्ते स्वयं महान्तः । [उपसृत्य] पारे खलु गिरां प्रभावस्ताप-सानाम् ।

ध्यायतोऽप्यस्य यत्किञ्चित् सन्निधिं वचनादृते ।
अभिगन्तुं बिभेत्येकः स्तिमितस्योदधेरिव ॥ ६ ॥

[भगवन्! राजमन्त्री रैवतको नमति ।]

राजा— वत्स! नीतयः प्रकाशन्ताम् ।

रैवतकः— भगवन्! अपि प्रकाशते तदनामयं ज्योतिः ।

---

१. 'खिज्ज, वीसा' ख.   २. 'प्रकाश्यते' ख.

राजा—

यस्मिन् दृष्टे न स्वदन्ते[1]ऽन्यभावा-
　श्चेतः काष्ठां निर्वृतेरश्नुते च।
दिष्ट्या दृष्टं[2] तद्यदासीत् तदादि
　ध्यायं ध्यायं तन्मया स्थीयतेऽद्य ॥ ७ ॥

रैवतकः— भवन्त एव तज्ज्ञातुं नन्दितुं च प्रभवन्ति।

विदूषकः— [स्वगतम्] अण्णदोमुहं एव्व देवेण मंतिअं। (अन्यतोमुखमेव देवेन मन्त्रितम्।)

वसुमती— [आकर्ण्य] किं मए विअ एदिणा वि दिट्ठो सो महाराओ। (किं मयेव एतेनापि दृष्टः स महाराजः।)

रैवतकः— भगवन्! श्वेतकेतुबोधितसौलभ्यतया विश्वासेन किञ्चिदध्येषयामि।

राजा— तेन हि निश्शङ्कमावेद्यताम्। पार्थिवतन्त्राः खलु प्रवृत्तयो ब्राह्मणानाम्।

रैवतकः— अस्ति राजकन्यका वसुमती नाम या भूतगृहीतेत्यस्माभिरवसीयते।

राजा— [स्वगतम्] बुद्धिपूर्वकमारोप्यत इति वक्तव्यम्।

वसुमती— (स्वगतम्) हण्णीयदि त्ति सुवअं। (हन्यत इति सुवचम्।)

---

१. 'स्वदन्त्यन्य' क.　　२. 'दिष्टं' ख.

रैवतकः— सा पुनः सकृदवलोकनीया। तावता कृतार्थाः स्मः।

राजा— (स्वगतम्) कृतार्थोऽसीति किं नोच्यते।

[विदूषकमवलोकते।]

विदूषकः— तह दट्ठूण विभूतिदाणजंतबंधणादिहिं अणुगह्णी-अदु तवस्सिणी। (तथा दृष्ट्वा विभूतिदानयन्त्रबन्धनादिभिरनुगृह्यतां तपस्विनी।)

राजा— यथा भवते रोचते।

रैवतकः— [उत्थाय परिक्रम्य] इत इतो भर्तृदारिका।

वसुमती— [सपरिवारोपसृत्य निर्वर्ण्य] ण गह्णइ तेजोमअं रूवं पडिहदा मह दिट्ठी। [निभृतं निवर्ण्य स्वगतं सस्पृहं] हिअअ! दुव्विणीदं होसि। जं अण्णसंकदभावं वि मं कुळंगणाविरुद्धे पहे पवट्टेसि। (न गृह्णाति तेजोमयं रूपं प्रतिहता मम दृष्टिः। हृदय! दुर्विनीतं भवसि यदन्यसङ्गतभावामपि मां कुलाङ्गनाविरुद्धे पथि प्रवर्तयसि।)

चतुरिका— (अपवार्य) हळा संमं पुळेएसु।(हळा! सम्यक् पश्य।)

तपउ भसिद्धभेरेहिं कुणउ अ चम्मेण अंबरं एसो।
सो च्चिअ कथमिह तेओ तावस(वि?)रूवं करे गुणकिणं अ ॥८॥

सो च्चिए कथमित्ति मणसि मे संसओ वट्टइ।

(तपतु भसितभैरः करोतु च चर्मणाम्बरमेषः।
स एव कथमिह तेजस्तापरूपं करे गुणकिणं च ॥
स एव कथमिति मनसि मे संशयो वर्तते।)

वसुमती— (अपवार्य) अपरिमेअतेओविसेसा तावसा होन्ति। भग्गवंगिरसेसु सत्तग्गाहिणो वि सुणीअंदि। ता कअं संसएण। (अपरिमेयतेजोविशेषास्तापसा भवन्ति। भार्गवाङ्गिरसेषु शस्त्रग्राहिणोऽपि श्रूयन्ते। तत् कृतं संशयेन।)

रैवतकः— स्वामिनि! प्रणम भगवन्तम्। [वसुमती प्रणमति।]

राजा— अभिमतेन पत्या युज्यस्व।

[वसुमती लज्जते।]

राजा— [आमात्यं प्रति] उपविशत्वत्रैव कल्याणी।

[वसुमती उपविशति।]

राजा— [निर्वर्ण्य स्वगतम्]

क्षामं कपोलफलकं विशदाङ्गयष्टि-
दृष्टिस्त्वपाङ्गवलनेऽप्यलसा निकामम्।
सर्वं च विक्रियत एव पुरापि रिक्तो
मध्यः परं वरतनोस्तदवस्थ एकः॥ ९॥

चतुरिका— [निभृतं निर्वर्ण्य सहर्षमपवार्य, संस्कृतमाश्रित्य]

सैव प्राभवशंसिनी ननु दृशां रीतिस्तदेव स्मितं
सैवारण्यकलोकदुर्लभतरा वीरोद्धता चासिका।
तत्तेजःपरिवेषि हारि च वपुः किन्तु श्लथं पाण्डु च
स्वैरं पश्य तपस्विनि! प्रतिकलं मन्ये कृतार्था ह्यसि॥१०॥

वसुमती— [भुजस्पन्दमभिनीय स्वगतं] संवदइ विअ मे सिविणओ। (संवदतीव मे स्वप्नः।)

विदूषकः – [स्वगतम्] एसो वअस्सो चिरं तिसिएहिं लोअणेहिं दीहरदीहरं णिप्पच्चूहं पासइ । (प्रकाशं) भअवं भूदसंकापरिच्छेदस्स सम्मं पुळोएसु । वच्छे वसुमइ इदो वि ईसि सण्णिहिदा भविअ खणमेत्तं भअवम्मि दिण्णदिट्ठी चिट्ठ । (एष वयस्यश्चिरं तिसृभिर्लोचनैर्दीर्घदीर्घं निष्प्रत्यूहं पश्यति । भगवन्! भूतशङ्कापरिच्छेदस्य सम्यक् पश्य । वत्से वसुमति! इतोऽपि ईषत् सन्निहिता भूत्वा क्षणमात्रं भगवति दत्तदृष्टिस्तिष्ठ ।)

राजा— (स्वगतम्) उपहसत्ययं जाल्मः ।

वसुमती— (उपसृत्य) उवकिदह्मि सेदकेदुणा । (उपकृतास्मि श्वेतकेतुना [निर्वर्ण्य स्वगतम्]

सुंदेरमेत्तिअं से कादुं चिरमब्भसंतेण ।
विहिणा कअत्ति मण्णे कंदप्पवसंतखंदअजअंता ॥११॥

(सौन्दर्यमीदृशमस्य कर्तुं चिरमभ्यस्यता ।
विधिना कृता इति मन्ये कन्दर्पवसन्तस्कन्दजयन्ताः ॥)

राजा— [निभृतं निर्वर्ण्य स्वगतं]

प्रभवति कथं बाहुर्बालां प्रहर्तुमवेक्षसे
नियतमथवा नेमामालोकसे प्रहरन्नपि ।
यदि हि कलयस्येनां स्वस्थां भवेर्निरपेक्ष इ-
त्यपिहितवती नेत्रे तां विद्धयतः स्मर! ते रतिः ॥१२॥

रैवतकः— भगवन्! अपि परिभूयते भर्तृदारिका भूतेन ।

राजा— परिभूयत एव जरत्पिशाचिकया ।

वसुमती— (स्वगतम्) सच्चं एदं। (सत्यमेतत्।)

रैवतकः— तर्हि रक्षणीया यन्त्रबन्धनेन।

राजा— वत्स श्वेतकेतो! उपनय भूर्जत्वचं कुङ्कुमं च। [विदूषकः अर्पयति।]

राजा— [ध्यानं नाटयन् विलिख्य निर्वर्ण्य स्वगतं] हन्त! किमेतत्।

हृदयं तत्परतन्त्रं यावल्लिखितुं प्रवर्तते यन्त्रम्।
तावदसौ लिखति कथं तामेवाभ्यासपरवशः पाणिः ॥१३॥

विदूषकः— [विलोक्य स्वगतम्] सच्चं समयासहिण्णू उम्मत्तओ एसो। (सत्यं समयासहिष्णुरुन्मत्तक एषः।)

चतुरिका— [अपवार्य] हला संसअसिलेअविपज्जत्तं एदं। (हला। संशयश्लेषविपर्यस्तमेतत्।)

वसुमती— [अपवार्य] पज्जत्तं विअ। (पर्यस्तमिव।)

चतुरिका— भअवं कुदूहलादो किंवि जंतम्मि पुच्छीअदि। (भगवन्! कुतूहलात् किमपि यन्त्रे पृच्छ्यते।)

विदूषकः— [हस्तेन मुखं पिधाय सभयं] वच्छे एवं ण पुच्छसु! संवरणिज्जाणि णाम मंतजंतकज्जाणि। (वत्से! एवं न पृच्छ। संवरणीयानि नाम मन्त्रयन्त्रकार्याणि।)

राजा— मा मैवम्। पृच्छतु नाम कुतूहलिनी।

चतुरिका— एत्थ दाव मह भट्टिदारिआ कुदो लिहिआ। (अत्र तावन्मम भर्तृदारिका कुता लिखिता।)

रैवतकः--- आ! प्रष्टव्यमेव पृष्टवती भद्रा ।

[विदूषकः सभयस्तिष्ठति ।]

राजा — यन्त्रेषु कतिपयेषु प्रधानतः साध्या लिख्यन्ते ।

वसुमती— (चतुरिकां प्रति अपवार्य) हळा! मणोरहप्पहाणे अण्णदोमुहं एव्व । (हला मनोरथप्रधाने अन्यतोमुखमेव ।)

चतुरिका— णं मुद्धे संवरणं एदं । (ननु मुग्धे! संवरणमेतत् ।)

राजा— [पुरो निधाय अभिमन्त्रणनाटितकेन स्पृशन् स्वगतम्]

चित्रगतैव स्पर्शादियन्तमानन्दमावहत्येषा ।
अबला कियदिव साक्षादविरलमालिङ्गिता सुखयेत् ॥१४॥

[विदूषकं प्रत्यपवार्य]

अभिनवबिसकाण्डस्कन्धमुग्धान्यमुष्या
विकचनवशिरीषस्रङ्मृदून्यङ्गकानि ।
प्रसरति परिरब्धुं मामनामन्त्र्य बाहु-
र्गणयति च निरोधं नैव मे किं करोमि ॥१५॥

विदूषकः— [स्वगतं] एव्वं होदु । [प्रकाशम्] रेवदअकेण वि ण दंसणिज्जाणि णाम देवकज्जाणि । एदं बंधीअदि जंतं । (एवं भवतु । रैवतकेनापि न दर्शनीयानि नाम देवकार्याणि । एतद्बध्यते यन्त्रम् ।)

रैवतकः— इतः सर्वैरपगम्यते । नमो भगवन्! अनुमन्यस्व ।

राजा— मुहूर्तमात्रं बहिरास्यताम् । [सपरिवारो रैवतको निष्क्रान्तः ।]

[चतुरिका गन्तुमिच्छति ।]

वसुमती— हळा मा गच्छ। मा गच्छ।(हला ! मा गच्छ, मा गच्छ)

विदूषकः— अइ मा आयासेण । इमाए हिअअणिव्विसेसा तुमं चिट्ठ । (अयि ! मा आयासेन । अस्या हृदयनिर्विशेषा त्वं तिष्ठ ।)

राजा— [जनान्तिकं] साधु धावक! साधु । सफलीकृतः परिश्रमो मे सकलोऽप्यनेन संविधानेन ।

विदूषकः— भअवं तुवर । तुवर । (भगवन् ! त्वरस्व । त्वरस्व ।)

राजा— (यन्त्रमादाय) सुन्दरि ! प्रसार्यतां बाहुः । [वसुमती लज्जते ।]

चतुरिका— [सहर्षं] सहि! किदत्थासि, जं णेण राएसिणा सुंदरि त्ति आमंतिदासि । (सखि! कृतार्थासि यदनेन राजर्षिणा सुन्दरीत्यामन्त्रितासि ।)

विदूषकः— [सहासं] कहं आरण्णओ राआ मण्णीअदि । (कथमारण्यको राजा मन्यते ।)

चतुरिका— कहं तुह्मकेरगुणरूवगणणिआवरा अह्मे अदिसंधीअन्तु । ण खु पहवन्तो विअ विह्मरणसीळा अह्मे । (कथं युष्मदीयगुणरूपगणनिकावृते आवामातिसन्धीयायहे । न खलु प्रभवन्तः इव विस्मरणशीले आवाम् ।)

राजा—

अयि कथं बत सत्यमिदं वचः प्रभवता यदि विस्मियते(?) मया ।
किमिति चर्मकृतं वसनं तदा किमिति वा भसितं च विलेपनम् ॥१६॥

वसुमती - [स्वगतम्] हिअअ ! पज्जत्तं फळं जीविदस्स [प्रकाशम्] हळा असंबद्धप्पळाविणि किं उवक्कंदं किं मंतीअदि । [सकोपं जिगमिषति ।] (हृदय! पर्याप्तं फलं जीवितस्य । हला असम्बद्धप्रलापिनि! किमुपक्रान्तं किं मन्त्र्यते ।)

चतुरिका— कअं दाणिं ळज्जाए। सुमर वीसंभजप्पिदाइं । (कृतमिदानीं लज्जया । स्मर विस्रम्भजल्पितानि ।)

वसुमती— किं वीसंभजप्पिदं । (किं विस्रम्भजल्पितम् ।)

चतुरिका— तं राएसिं अदट्ठूण केत्तिअं काळं जीविदभारं धारेमि त्ति । (तं राजर्षिमदृष्ट्वा कियन्तं कालं जीवितभारं धारयामीति ।)

[वसुमती निरुन्धे । राजा बलादङ्कमारोपयति ।]

विदूषकः— सुमुहुत्तो होदु । (सुमुहूर्तो भवतु ।)

राजा— [स्पर्शसुखमभिनीय] स्थाने मिथ्याभिजल्पन्नप्यतिसन्दधे देवीम् ।

आचूडाचरणं सचन्द्रशकलैर्लिप्तं नु मे चन्दनै-
रश्रान्तं परितोऽभिषिक्तमथवा नीहारधाराम्भसा ।

आनन्दामृतसागरान्तरथवा मग्नं नु सत्यं त्विदं
कामश्चन्दनचन्द्रकान्ततुहिनैरन्यद्वपुर्निर्ममे ॥ १७ ॥

[वसुमती पराची लज्जते ।]

चतुरिका— [सोपहासं] हळा किं दाणिं गच्छह्म ।
(हला! किमिदानीं गच्छावः ।)

वसुमती— जइ अप्पणो पहवामि । (यद्यात्मनः प्रभवामि ।)

राजा— वज्रमयैरक्षरैः क्रीडसि ।

वसुमती— (बलादुत्तिष्ठन्ती) हळा अदिक्कमीअदि धम्मो ।
(हला अतिक्रम्यते धर्मः ।)

चतुरिका— सव्वण्णू राआ तुए सिक्खीअदि ।
(सर्वज्ञो राजा त्वया शिक्ष्यते ।)

राजा— सुन्दरि! गान्धर्वोऽपि शास्त्रीयो विवाहः ।

विदूषकः— (सोपहासं) चउरिए! जंतबंधणसमए अह्मेहिं वि ण संणिहादव्वं । ता एहि गच्छह्म । [परिक्रामतः ।] (चतुरिके यन्त्रबन्धन-समये आवाभ्यामपि न सन्निधातव्यम् । तदेहि गच्छावः ।)

वसुमती— हळा एआइणी वट्टेमि । (हला एकाकिनी वर्ते ।)

चतुरिका— सव्वळोअणाहसणाहा कहं एआइणी तुमं । [इति

निष्क्रान्ता ।] (सर्वलोकनाथसनाथा कथमेकाकिनी त्वम् ।)

[वसुमती वेपते ।]

राजा— कृतं कृतमुत्कम्पेन ।

अधरदळमेतदबले! करतलपरिमृष्टविद्रुमदळाभम् ।
आस्वादये बलादपि किञ्चित् त्वनुमन्यतां भवती ॥१८॥

[इति कपोलयोर्गृह्णाति ।]

वसुमती— अज्जउत्त मुंच मुंच । [नाट्येन परिहरति ।]
(आर्यपुत्र ! मुञ्च मुञ्च ।)

राजा— साधु श्रवण रे! साधु । यदभिलष्यते सर्वकरणैरपि तवाधिकारः ।

अपहर निकाममधरं धारय शोणं तथाक्षिकोणं वा ।
वचनं निषेद्धुमपि वा वद पुनरेवं कृतार्थय श्रवसी ॥१९॥

[नेपथ्ये]

भो भो नगररक्षिणः! भगिन्या पद्मावत्या पत्रिकामुखेन बोधिता ज्वालावती वः सर्वानाज्ञापयति—

विचीयतां पुरी सर्वापि जनो न प्रवेश्यताम् ।
तेजोरूपविशिष्टस्तु विशिष्यैव निरुध्यताम् ॥२०॥

तथा निरुध्यतां कन्या तत्रैवान्तःपुरान्तरे ।
न पश्यन्ति न जल्पन्ति वयस्या अपि तां यथा ॥२१॥

राजा— प्रायेण सूक्ष्मदर्शिनी सचिवा पद्मावती वञ्चनामपि मे वञ्चयति ।

वसुमती— [सभयं] हा हदह्मि देव्वदुव्विळसिदेण मंदभाइणी । [सास्रं] एत्तिओ वसुमईए णिम्माणप्पआसो विहिणो । [त्वरितं निष्क्रान्ता:] (हा हतास्मि दैवदुर्विलसितेन मन्दभगिनी । एतावान् वसुमत्या निर्माणप्रयासो विधेः ।)

राजा— हन्यत एव हतो विधिना । (सास्रं) एष शुष्यतो वनस्पतेस्तृष्यतो वा चातकस्य वर्षप्रसङ्गेन वज्रघातः ! [परिक्रम्य निष्क्रान्तः ।]

द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

[ततः प्रविशति सुनीतिः ।]

सुनीतिः— यत् किल कष्टमुपसर्पणं पृथ्वीभुजाम् । कष्टतरममात्यभावेन । कुतः—

दण्डः सागसि पात्य एव रिपुवन्मित्रे सुते वा स्वतो
न त्वर्थैर्गुणदर्शनेऽपि सुहृदः संयोजनीयाः स्वयम् ।
कार्ये सङ्कटिते गुणः स्वनृपतावारोपणीयो निजः
कस्मिन्नप्यपराधिनि प्रतिदिनं दोषास्तु धार्याः स्वयम् ॥ १ ॥

इत्येतदपरेषाम् । अस्माकं पुनरनेकजन्मतपःपरिपाकफलमेव सेवनं समस्तकल्याणगुणाकरस्य चित्रसेनस्य । य एषः,

गम्भीरः परिशीलने तु सरलो भृत्येषु सारं सकृत्
सम्भाष्यैव परिच्छिनत्ति गुणिषु प्राणेष्विव स्निह्यति ।
छिद्रं किञ्च समीकरोति निजया बुद्ध्यैव भृत्यार्जितं
दोषं तत्र विविच्य वेत्ति च धियो मान्द्यं च दैवं च वा ॥ २ ॥

इयानपि समस्तभृत्यसाधारणो महाराजस्य । दवीयसी खलु वाङ्मनसयोर्दया तु मयि देवस्य ।

ब्रूते मां प्रति मत्कृते कृतमिव स्वं तावदर्थार्जनं
ह्रासे कोशगृहस्य हेतुवचनैराश्वासयत्येष माम् ।
ईष्टे नैष तथा यथा स्वयमहं दातुं ग्रहीतुं च वा
राजेत्यक्षरमात्रमस्य सकला मय्येव राज्यस्थितिः ॥ ३ ॥

---

१. 'भावेन । दण्डः०' ख. २. 'लनेषु सर' ख.

तथा जानामि गुणातिशयपक्षपातादिव दैवमप्यस्मिन्नानुकूल्यमनु-
बध्नाति यथा जातिचोरो निसर्गचपलोऽपि मलयकेतुर्निदेशकारी विस्रम्भणीयश्च संवृत्तः । यथा च तेन कलिङ्गनगरं यावदप्रत्यूहमेक-मेव बिलद्वारमतन्यत निवृत्तजनप्रचारघोरेऽपि तत्र विन्ध्यकान्तारे । यत्र हि—

पृथ्वीमग्नविशालकन्दरकुटीगर्भस्थलीनिर्भर-
क्रीडत्सन्ततगन्धसिन्धुरघटाकोलाहलोल्लासिनः ।
अन्तःस्तम्भितकुम्भसम्भवगतक्रोधाट्टहासा इव
प्रायो भान्ति वनान्तभीमविषमा विन्ध्यस्य पादा गिरेः ॥ ४ ॥

किञ्च,

अम्भस्सम्भिन्नगण्डोपलशकलझलात्कारिघोराभिघात-
प्रक्षुभ्यन्मन्दमन्दप्रचलितविपुलोल्लोलदुर्लक्षलक्ष्मीः ।
स्रोतोभिस्सोमसूतिर्गिरिशिरसि पृथग्भूय भूयो वहन्ती
यत्र द्वित्रिविलङ्घ्या तटविटपिकुलोत्पाटनाटोपभीमा ॥ ५ ॥

यथा च तेनैव पथा गतेन मलयकेतुना कारागृहान्तरनियन्त्रिता वसुमती सख्या सह मञ्चमधिशय्य रैवपन्त्येव वकुलोद्यानमिदानी-मानीता । यत् किल तदा तदा दुर्मनायमानस्य देवस्य मनोविनोदनं भवति । [विमृश्य] भवतु को दोषो यदुत चौर्येण कन्यका नीतेति ।

यस्या एव विधेयमेतदखिलं ज्वालावतीं रूक्षितां
तामेव प्रति तानि किं कथयतां सामादिकं नः फलेत् ।
देवीबन्धुषु युक्त एव न पुनर्दण्डश्च चण्डक्रमे
क्रोधाविष्टभुजावकृष्टविनतज्याबन्धनृत्यद्धनुः ॥ ६ ॥

१. 'गन्धोपल' ख. २. 'स्वपत्येव' ख.

जाता शान्तिमतः समानविभवादुत्पत्तिपूतादियं
शीलं बुद्ध्यत एव यद् गुरुजनेष्वद्याप्यसौ प्रश्रिता ।
रूपं यद्यनवद्यमुग्धमधुरं श्रेयस्करं पत्युर-
प्येषा किं परमिष्यते च विभुना तत् केन नानीयताम् ॥ ७ ॥

[सानुस्मरणं] अथवा कात्र विचारणा यदस्या मातरोऽपि गूढममुमर्थ-मनुमोदन्ते ॥

[नेपथ्ये]

इदो इदो बउळुज्जाणं । (इत इतो बकुळोद्यानम् ।)

सुनीतिः— [कर्णं दत्त्वा] मन्ये वसन्तकदर्शितपथो देवो बकुळोद्यानमभिवर्तते । तत् सुविहितम् । यावदहमप्यतर्कितोपनतकामिनीसमागमनानन्दमन्थरं देवमर्थवशादुपतिष्ठामि । [इति निष्क्रान्तः ।]

शुद्धविष्कम्भः ।

[ततः प्रविशति राजा विदूषकश्च ।]

विदूषकः— इदो इदो भवं । (इत इतो भवान् ।)

राजा— [परिक्रामन्निःश्वस्य] अतिभूमिं गतो देव्याः कोपः । कुतः । पुरा किल,

वैयात्यं परमं तदेव सुतनोर्यच्छोणकोणे दृशौ
पारुष्यं वचनेषु तत्तु परमं यच्चाधरश्चञ्चलः ।

शिक्षारूक्षतरा च सा बहुमतिं यन्मे न सम्मन्यते
सा मां धिङ् मम जीवितं चरणयोर्नम्रं विधूय व्यगात् ॥ ८ ॥

विदूषकः— किं उण महिसी कण्णअंतरदिण्णभावं दइअं मुणिअ पूएउ। ता दुवेसु वि महिळासुं सिथिळप्पच्चासदाए गळिअमिअतिण्हिआ-पाणव्ववसाओ णिरंतरं आहारसुहं अणुभवंतो रज्जं चिरस्स पाळेसु। (किं पुनर्महिषी कन्यकान्तरदत्तभावं दयितं ज्ञात्वा पूजयतु। तस्माद् द्वयो-रपि महिळयोः शिथिलप्रत्याशतया गलितमृगतृष्णिकापानव्यवसायो निरन्तर-माहारसुखमनुभवन् राज्यं चिरस्य पालय।)

राजा— मूर्ख! निरन्तरमाहारमात्रसुखितोऽसि। आदेशय पन्थानम्। यावदिह प्रियतमाविप्रयोगरूक्षितं हृदयं प्रमदवनालोकन-कौतुकेन विनोदयामि।

विदूषकः— इदो इदो वउलुज्जाणं। पेक्ख दाव रुक्खसिहर-णिळीअंतभसलकणइल्लमोरपारेवअप्पमुहाविविहाविहगउळपाडिबिंबसंबंधर-म्मदाए फळिहेक्कणिव्वट्टिअं वि आळवाळकुट्टिमं वइरवेल्लुज्जमुहणवरअण-कप्पिदं विअ लक्खीअदि। (इत इतो बकुलोद्यानम्। पश्य तावद् वृक्ष-शिखरनिलीयमानभ्रमरशुकमयूरपारावतप्रमुखविविधविहगकुलप्रतिबिम्बसम्बन्ध-रम्यतया स्फटिकैकनिर्वर्तितमपि आलवालकुट्टिमं वज्रवैडूर्यमुखनवरत्नकल्पित-मिव लक्ष्यते।)

राजा— [निर्वर्ण्य] एवमेतत्। इतः पुनरवलोक्यताम्—

अविरलविलम्बिमौक्तिकमणिसरनिभमञ्जरीपरीतोऽयम्।
पुनरुत्सलिलसेकः सन्ततमकरन्दबिन्दुभिर्नीपः ॥ ९ ॥

[उभौ नाट्येन प्रवेशं रूपयतः।]

राजा— [समन्तादवलोक्य] पश्य पश्य ।

अविरलजलसेकस्निग्धमुग्धोन्नतानां
हरितघनदलानामत्र रम्भागृहाणाम् ।
मदचटुलमयूराक्रान्तिभुग्नच्छदान्त-
क्षणसुलभनिरीक्षाविभ्रमा गर्भसीमाः ॥ १० ॥

विदूषकः— इमस्सिं चिअ पिक्कमोआफलभक्खणकलहाअंतमदकलसुअलोअकोलाहलुल्लसिअगअणंतरे रंभामंदिरे जाव उवविसम्मो । (अस्मिन्नेव पक्वमोचाफलभक्षणकलहायमानमदकलशुकलोककोलाहलोल्लसितगगनान्तरे रम्भामन्दिरे यावदुपविशावः ।)

राजा— यथा भवते रोचते । [उपविशतः ।]

राजा— कथमत्र पवनस्यापि रसिकता परोपकारव्यसनिता च । तथाहि—

आकर्षन्नलिवेणिकां लवलिकामालिङ्ग्य तस्याः स्वयं
मन्दं मन्दमपाकरोति पवनः पत्रावलीकञ्चुकम् ।
किञ्चायं लघुचालितान्यविटपस्थायिप्रियाकास्मिक-
स्पर्शत्याजितकेलिकोपविरहातङ्कान् विधत्ते शुकान् ॥ ११ ॥

अये पवन! रसिकमानिन्! मुग्धप्राय एवासि । [सोत्कण्ठं]

निष्प्रत्यूहगतिः किलास्युपसरन् वातायनेन प्रियां
किं तस्याः सुकुमारमुग्धमधुराण्यङ्गानि नालिङ्गसि ।
यद्यस्त्येव परोपकारघटने कौतूहलं मारुत!
स्पृष्ट्वा मन्दममूं ममापि सकृदप्यङ्गानि सम्भावय ॥ १२ ॥

विदूषकः— [आत्मगतम्] कहं एत्थ वि से वसुमईए एव्व हिअआवक्खेवो । (कथमत्राप्यस्य वसुमत्यामेव हृदयाक्षेपः ।)

[ततः प्रविशति मञ्चोपविष्टा वसुमती चतुरिका च ।]

चतुरिका— [स्पर्शसुखमभिनीय] अच्चरिअं अच्चरिअं । हळा ! पेक्ख पेक्ख । वउळकदंबचंपअप्पमुहबहळकुसुमउळपरिमळसारभार-मिळणादु विअ मंथरो णळिणदळपुडचळणसंभवो विअ सोमसीअळो वाइ मंदाणिळो । (आश्चर्यमाश्चर्यम् । सखि ! पश्य पश्य । बकुळकदम्ब-चम्पकप्रमुखबहुलकुसुमकुलपरिमलसारभारमिलनादिव मन्थरो नळिनदळपुट-चलनसम्भव इव सौम्यशीतलो वाति मन्दानिलः ।)

वसुमती— तुए एव्व एदं दिट्ठं । मए उण अण्णं ळक्खी-अदि । को एसो आमूळग्गं पळीविओ विअ वंमहरहो डज्झइ मह दिट्ठिं । (त्वयैवैतद् दृष्टम् । मया पुनरन्यल्लक्ष्यते । क एष आमूलाग्रं प्रदीपित इव मन्मथरथो दहति मम दृष्टिम् ।)

चतुरिका— णं कणअसरिवण्णसिणिद्धकुसुमपुण्णसोम्मदंसणो चम्पओ एसो । (ननु कनकसदृग्वर्णस्निग्धकुसुमपूर्णसौम्यदर्शनश्चम्पक एषः ।)

विदूषकः— काए वि इत्थिआए आळावो विअ सुणीअदि । (कस्या अपि स्त्रिया आलाप इव श्रूयते ।)

राजा— [किञ्चिच्छ्रुतिमभिनीय विहस्य] भ्रान्तमनेन मूर्खेण । विविक्तमधुरमिति विस्रब्धया वनदेवतया वीणेव वाद्यते ।

तनुतरतया सञ्च्छन्नोऽपि स्वनैः पिकबर्हिणां
किमपि किमपि व्यक्तो व्यावर्तयन्नितरस्वरान् ।

मम हि निभृते श्रोत्रे वीणारवः खलु कोऽप्ययं
मधुरमधुरोन्मेषैर्धारामृतैरभिवर्षति ॥ १३ ॥

चतुरिका— [समन्तादवलोक्य]हळा! कस्स वि महाभाअधेअस्स पेक्खणिज्जं इदं उज्जाणं । (सखि! कस्यापि महाभागधेयस्य प्रेक्षणीयमिदमुद्यानम् ।)

वसुमती— हळा असंबद्धं मंतेसि । कहं काराघरंतरणिअंतिदाणं अह्माणं उज्जाणदंसणं । (सखि! असम्बद्धं मन्त्रयसे । कथं कारागृहान्तरनियन्त्रितयोरावयोरुद्यानदर्शनम् ।)

चतुरिका— अदो खु अच्चरिअं । (अतः खल्वाश्चर्यम् ।)

वसुमती— अहव मए मुणिअं । णिसग्गणिट्ठुरा खु जाळावई काराघरचिअसुहप्पसुत्तं घेत्तूण सज्जो मारेमि त्ति उज्जाणहदअस्स मज्झं पावेइ जह मत्तकोइळा मह तिक्खसल्लेहिं पूरेंति कण्णविवरं, जह कमळामोदमेदुरा समीरा वि खदिरंगारणिवहेहिं वरिसंति सअलमंगं । (अथवा मया ज्ञातम् । निसर्गनिष्ठुरा खलु ज्वालावती कारागृहचिरसुखप्रसुप्तां मां गृहीत्वा सद्यो मारयामीति उद्यानहतकस्य मध्यं प्रापयति, यथा मत्तकोकिला मम तीक्ष्णशल्यैः पूरयन्ति कर्णविवरं, यथा च कमलामोदमेदुराः समीरा अपि खदिराङ्गारनिवहैर्वर्षन्ति सकलमङ्गम् ।)

चतुरिका— [सास्रं] सहि मा खिज्ज, मा खिज्ज । वाआमेत्तेण आसासणं वि केण हेदुणा कुणइस्सं । (सखि! मा खिद्यस्व, मा खिद्यस्व । वाङ्मात्रेण आश्वासनमपि केन हेतुना करिष्यामि ।)

विदूषकः— ही ही! वण्णावळी सुणीअदि । वअस्स कस्स दाणिं मुरुहत्तणं । (ही ही! वर्णावलिः श्रूयते । वयस्य! कस्येदानीं मूर्खत्वम् ।)

राजा— [कर्णं दत्त्वा] ननु च विश्रमशारिकाचरितोऽयमुद्देशः। कदाचिदयमासामालापो भवेत्। सर्वथा निभृतं शृणुवः।

वसुमती— जह मंदाणिळचाळिदादो रुक्खसिहरादो णिवडंति कुसुमजाळाइं तह जाणामि अणंतकुसुमं उज्जाणं उवळक्खिअ गदबाण-परिक्खअसंसओ वम्महो णिरंतरमासुआइं मइ वरिसइ। (यथा मन्दा-निलचालिताद् वृक्षशिखरान्निपतन्ति कुसुमजालानि तथा जानामि अनन्तकुसु-मुद्यानमुपलक्ष्य गतबाणपरिक्षयसंशयो मन्मथो निरन्तरमाशुगान् मयि वर्षति।)

राजा— कस्या अपि प्रियविरहिताया मधुरोऽयमालापः।

विदूषकः— पच्चइतत्ताए देवीए कदाइ आळावो होइ। (पश्चा-त्तप्ताया देव्याः कदाचिदालापो भवेत्।)

[ततः प्रविशति देवी सूक्ष्मदर्शिनी च।]

राजा— आः कोऽयममृतनिम्बयोरैक्यभ्रमः।

सूक्ष्मदर्शिनी— अइ सरळे! किंति कण्णअंतरदिण्णभावे वि तस्सिं जणे एत्तिओ दे विणओ। णं भणामि माणं गह्णीअ चिट्ठेत्ति। जं सच्चं सअं गदुअ अप्पाणं ळहूकरेसि। (अयि सरले! किमिति कन्य-कान्तरदत्तभावेऽपि तस्मिन् जने एतावांस्ते विनयः। ननु भणामि मानं गृहीत्वा तिष्ठेति। यत् सत्यं स्वयं गत्वा आत्मानं लघूकरोषि।)

देवी— (सानुतापं) कअं कअं दाणिं तुह्म उवदेसेण। (कृतं कृतमिदानीं तवोपदेशेन।)

[संस्कृतमाश्रित्य]

तस्मिन्नीक्षित एव मे शिथिलितो मानस्त्वया धारितः
सम्प्राप्तेऽपि सुरक्षितः प्रियशतालापेऽपि नोत्सारितः।

किं वक्ष्ये चरणानतेऽपि दयिते नासीत् कथाशेषितो
मामद्य स्वयमेव पश्य खदिराङ्गारैरसौ सिञ्चति ॥ १४ ॥

ता वउलुज्जाणगअं एदं अण्णेसिअ सअं एव्व कण्ठग्गहणेण अणुणेमि । (तस्माद् बकुलोद्यानगतमेतमन्विष्य स्वयमेव कण्ठग्रहणेनानुनयामि ।)

[परिक्रामतः ।]

सूक्ष्मदर्शिनी— जइ दाणिं वि ताए एव्व अहिणिविट्ठो[1] आसि तदा गदुअ वि किं करिस्ससि । (यदि इदानीमपि तस्यामेवाभिनिविष्टः स्यात् तदा गत्वापि किं करिष्यसि ।)

देवी— नहि तारिसाणं वि पणअसाराणं विवज्जासो होइ । (नहि तादृशानामपि प्रणयसाराणां विपर्यासो भवति ।)

सूक्ष्म— ण जाणासि णंदणवणवुत्तंतं । (न जानासि नन्दनवनवृत्तान्तम् ।)

देवी— कस्स वा एकवारं विवज्जासो ण होइ । (कस्य वा एकवारं विपर्यासो न भवति ।)

वसुमती— हळा ण सक्कुणोमि अप्पाणं धारेदुं । (सखि ! न शक्नोमि आत्मानं धारयितुम् ।)

राजा— [ससंभ्रमं] अत्यारूढमदनाभिषङ्गा कास्विदियमबला ।

अयि हृदय तवाद्य किन्न्वकाण्डे
विरहमहानलभस्मसात्कृतस्य ।

---

१. 'ट्टो सि' क.

विधुकरपरिरब्धचन्द्रकान्त-
स्फटिकमणेरिव कोऽप्ययं विकारः ॥ १५ ॥

विदूषकः— किं वि मणसि मे वट्टइ । असंभाविदं त्ति उण वत्तुं ळज्जेमि । ता तुमं कहेहि किं तुए णंदणवणे ताए सुरो पडिवण्णो । (किमपि मे मनसि वर्तते । असंभावितमिति पुनर्वक्तुं लज्जे । तस्मात् त्वं कथय किं त्वया नन्दनवने तस्याः स्वरः प्रतिपन्नः ।)

राजा— [निःश्वस्य] तत् किमायासयसि निकाममसंभावनाकवलितेन मनोरथमात्रेण । तदुपसृत्य लताविटपान्तरेण तावत् पश्यावः । [तथा कुरुतः ।]

राजा— [सहर्षकरुणं]

सन्तप्तेव मृणालिका रविकरैः शोच्यापि रम्याधिकं
शून्ये सन्ततबाष्पनिर्झरवहोच्छूने वहन्ती दृशौ ।
एकीकृत्य कृतेव कापि विधिना लावण्यदैन्यश्रियौ
सैवेयं मम वल्लभादिशति मां मध्ये सुधाङ्गारयोः ॥ १६ ॥

[सभयं] चक्षुषैव निर्निमेषेण चतुरमवलोकमानोऽप्यहं बहुविधस्वप्नविप्रलम्भभाजनतया सैवेयमिति सत्यं न परिच्छिनद्मि । ततश्च,

आनन्दैरुदितेन्दुकन्दलसमुद्धूतार्णवाडम्बरं
मोहैरापतदम्बुगर्भजलदोत्सीदन्नभस्सन्निभम् ।
आश्चर्यैश्च निवातगर्भभवनन्यस्तप्रदीपोपमं
यत्सत्यं न मयेदमीदृगिति वा चेतः परिच्छिद्यते ॥ १७ ॥

विदूषकः— [सहर्षं] मा दे सिविणअसंसओ होदु । णं मए वि

एसा पुडं ळक्खीअदि । (मा ते स्वप्नसंशयो भवतु । ननु मयाप्येषा स्फुटं लक्ष्यते ।)

चतुरिका— सहि! मा उत्तम्म । मा उत्तम्म । इमाइं णळिणीपत्ताइं सण्णिहिददिग्घिआदो अवचिणुअ अंगेसु दे देमि । [तथा करोति ।] (सखि! मा उत्ताम्य । मा उत्ताम्य । इमानि नळिनीपत्राणि सान्निहितदीर्घिकाया अपचीय अङ्गेषु ते ददामि ।)

राजा— चतुरिकया प्राण*

वसुमती— देण हि सव्वभूमंडळस्स त्ति भणिदव्वं । (तेन हि सर्वभूमण्डलस्येति भणितव्यम् ।)

चतुरिका— कहं विअ । (कथमिव ।)

वसुमती— ण दाव कण्णसल्लाइ कोइळवअणाइ सुणिअंति । ण अ णिसग्गदारुणो मंदपवणो वि मह अंगमंगं डज्झइ । ण वि जहपुरुवं हिअअसओ विरहग्गी पज्जळइ । णीसासूसा वि ण णीसहं पसरंति । (न तावत् कर्णशल्यानि कोकिलवचनानि श्रूयन्ते । न च निसर्गदारुणो मन्दपवनोऽपि ममाङ्गमङ्गं दहति । नापि यथापूर्वं हृदयशयो विरहाग्निः प्रज्वलति । निःश्वासोच्छ्वासावपि न निस्सहं प्रसरतः ।)

चतुरिका— जीवामि पिअसहि जीवामि । देण हि पुणो वि किं णळिणीदळाइ देमि । (जीवामि प्रियसखि जीवामि । तेन हि पुनरपि किं नलिनीदलानि ददामि ।)

---

* इतः परमादर्शयोः किञ्चिल्लुप्तं भाति ।

राजा— किमित्यत्यन्तदुर्लभागमननीरसे मयि नैर*......... मन्यते । तदाकुलितोऽस्मि ।

विदूषकः— से एव्व उत्तरवअणेण कदाइ पुडं होइ । तदो पक्खंतरे आउळिदो होहि । किं दाणिं । (अस्या एवोत्तरवचनेन कदाचित् स्फुटं भवति । ततः पक्षान्तरे आकुलितो भव । किमिदानीम् ।)

राजा— जाल्म! किं तदापि जीवता भवितव्यमाकुलेन ।

वसुमती—किंदु एअंधआरानिबिडाभोअभीसणं दिसामंडळं एव्व द्दिआओ गिह्णंति । हिअअं वि करणंतराणुधावणपरिस्संतं विअ सणिअं सणिअं विळीअदि । किं बहुणा । सुसुत्तिसुहं विअ दाव अणुहोमि । [मूर्च्छति ।] (किन्तु एकान्धकारनिबिडाभोगभीषणं दिशामण्डलमेव दृष्टी गृह्णीतः । हृदयमपि करणान्तरानुधावनपरिश्रान्तमिव शनैः शनैर्विलीयते । किं बहुना । सुषुप्तिसुखमिव तावदनुभवामि ।)

चतुरिका— [सखेदं] हा पमुसिदाह्मि दे वअणेहिं । (हा प्रमुषितास्मि ते वचनैः ।)

राजा— [सहर्षकरुणं] हन्त! स्वकार्यमात्रपरानिष्ठुरोऽहम् एवंगतामप्यमूं विलोक्य निर्वृणोमि संशयपरिच्छेदेन ।

चतुरिका— [पुनरपि नलिनीदलानि दत्त्वा] समस्ससिहि । समस्ससिहि । [मुखे हस्तं दत्त्वा] हा हदह्मि । ण संति णीसासा । हा कठिणे जाळावइ! किदत्थासि । [पुनर्वीक्ष्य सास्रमालिङ्ग्य] हा पिअचउरिए देहि मे पडिवअणं । हा देव्वहदअ! एदं वि मए दंसिदव्वं ।

* अत्र किञ्चिल्लुप्तमादर्शयोः ।

ता किं अहं अप्पाणं धारेमि । [उत्थाय] हा चित्तसेण कहिं सि । तुह दाव पाणणाडी विपज्जइ । (समाश्वसिहि । समाश्वसिहि । हा हतास्मि । न सन्ति निःश्वासाः । हा कठिने ज्वालावति ! कृतार्थासि । हा प्रियचतुरिके ! देहि मे प्रतिवचनम् । हा दैवहतक ! एतदपि मया द्रष्टव्यम् । तत किमहमात्मानं धारयामि । हा चित्रसेन ! कुत्रासि । तव तावत् प्राणनाडी विपद्यते ।)

विदूषकः — हद्धि हद्धि । पमादो । वअस्स ! उवसर उवसर । (हा धिक् हा धिक् । प्रमादः । वयस्य ! उपसर । उपसर ।)

[राजा अश्रुतिमभिनयति ।]

विदूषकः— [हस्तेन चालयन्] णं भणामि पमादो त्ति । (ननु भणामि प्रमाद इति ।)

राजा— [श्रुतिमभिनीय] हा प्रमुषितोऽस्मि । नन्वहम् अङ्गादङ्गं तत्तदवयवैकान्तसंक्रान्तदुर्ग्रहामपि दृशमवयवान्तरादिदृक्षया परं बलादाकृष्य सञ्चालयन्ननन्तरमान्तरेण केनापि विकारेण भूतेनेव प्रमुषितहृदयो निवृत्तकरणान्तरव्यापारतया न किञ्चिदपश्यम् अश्रौषं वा ।

विदूषकः— कअं वअणेहिं । झत्ति उवसरंतो समासासेहि णं । (कृतं वचनैः । झटिति उपसरन् समाश्वासयैनाम् ।)

[राजा त्वरितमुपसरन् वसुमतीं हस्तेन स्पृशति ।]

चतुरिका— [निर्वर्ण्य सहर्षविस्मयोन्मादं] हा पिअसहि दिट्ठिआ वड्ढसि । समस्ससिहि समस्ससिहि । [इत्युच्चैर्वदति ।] (हा प्रियसखि दिष्ट्या वर्धसे । समाश्वसिहि समाश्वसिहि ।)

सूक्ष्म— देवि ! आळावो विअ दूरादो सुणीअदि । (देवि ! आलाप इव दूराच्छ्रूयते ।

देवी— देण हि तदोमुहं एव्व गच्छह्म । (तेन हि ततोमुखमेव गच्छावः ।) [उपसर्पतः ।]

राजा— दिष्ट्या प्रत्यागतप्राणा मम जीवनाडी । कुतः, [उरसि हस्तं निधाय]

यथैतत् प्रस्विन्नं घनपुळकमुत्कम्पितकुचं
शमिष्यत्प्रोद्दामस्मरदहनसन्तापपरुषम् ।
तथापि प्रालेयद्रवविसरविन्यस्तामिव मे
विधत्ते हस्ताग्रं जडिमजनितस्तम्भसुभगम् ॥ १८ ॥

वसुमती— [आश्वस्य] हळा ! चंदणरसासारेहिं णिसिंचिअ सुहमुच्छिअं मं दुक्खसंताणाणुभवस्स पबोधेसि । (सखि ! चन्दनरसासारैर्निषिच्य सुखमूर्च्छितां मां दुःखसन्तानानुभवाय प्रबोधयसि ।)

चतुरिका— [सहर्षं] हळा ! णिच्चहिअअमेत्तसण्णिहिदं जणं दाव पुरो वि पुळोएसु । (सखि ! नित्यहृदयमात्रसन्निहितं जनं तावत् पुरोऽपि पश्य ।)

वसुमती— हळा ! अविण्णादगरुअपरिवेअणे सुहप्पइट्ठंतजीवणणिरोहिणा कअं आसासणेण । (सखि ! अविज्ञातगुरुपरिवेदने ! सुखप्रतिष्ठमानजीवननिरोधिना कृतमाश्वासनेन ।)

राजा— नन्वसावनङ्गज्वरजर्जरैरविरळनिपतदङ्गजास्रपातविवरद्वारनिरन्तरभवद्विरहानलज्वालावितानजर्जरैरङ्गकैरविरळमालिङ्गन् पुनरप्यपराध्यति ते दासः । [इत्यालिङ्गति ।]

वसुमती— [निर्वर्ण्य] हळा ! बहळसंकप्पहेदुणा पबोधणेण कहं परिहससि । (सखि ! बहलसंकल्पहेतुना प्रबोधनेन कथं परिहससि ।).

राजा— चतुरिके ! कथमनन्यसदृशमहाभाग्यता सत्यमियत्यपि महति संसारे ममैकस्य ।

चतुरिका— मा गव्वमुव्वह । णं तुवत्तो वि मह पिअसहीए । (मा गर्वमुद्वह । ननु त्वत्तोऽपि मम प्रियसख्याः ।)

वसुमती— [आकर्ण्य] कहं परप्फराळावसद्दो । अवि सच्चं एव्व अय्यउत्तो [लज्जां नाटयति ।] (कथं परस्परालापशब्दः । अपि सत्यमेवार्यपुत्रः ।)

विदूषकः— कहं पदसद्दो विअ । हद्धि । हद्धि । इदो एव्व सण्णिहिदा देवी । का गई । (कथं पदशब्द इव । हा धिक् । हा धिक् । इत एव सन्निहिता देवी । का गतिः ।)

राजा— [अश्रुतिमभिनीय]

प्रत्याशापि न सङ्गमं प्रति पुनर्यस्मिन्नभूदावयो-
र्यस्मिन्नद्य मम स्मृतेऽपि हृदयं हा वह्निना सिच्यते ।
तस्मिन्नप्यपरिक्षतेन विरहे यावन्मयैवास्ति मे
न ह्येतावदतर्कितोपनतया सत्यं त्वयाप्यद्भुतम् ॥ १९ ॥

विदूषकः— णं भणामि सण्णिहिदा देवि त्ति । (ननु भणामि सन्निहिता देवीति ।)

राजा— हा कष्टमागतं दैवदुर्विपाकेन ।

वसुमती— कहं जाळावईबहिणी । अय्यउत्त! परित्ताहि परित्ताहि । [मूर्च्छति ।] (कथं ज्वालावतीभगिनी । आर्यपुत्र ! परित्रायस्व परित्रायस्व ।)

राजा— हा इत्थमपि नाम द्रष्टव्यम् । [सास्रं] प्रमुग्धेव । हा दयितावधघातकिन् चित्रसेन ! किमुत्पन्न एव न विपन्नोऽसि ।

सूक्ष्म— अय्यवसंतओ विअ ळक्खीअदि । (आर्यवसन्तक इव इव लक्ष्यते ।)

देवी— [निर्वर्ण्य] अहइं। देण हि कदाइ अय्यउत्तो वि एत्थ होइ। ता जाव झत्ति गदुअ आणंदेमि [परिक्रामतः।] (अथकिम्। तेन हि कदाचिद् आर्यपुत्रोऽपि अत्र भवति। तस्माद्यावज्झटिति गत्वानन्दयिष्यामि।)

राजा— [निर्वर्ण्य] असीदत्यशनिपातः। [वसुमतीं वीक्ष्य] कथमद्यापि नोच्छ्वसिति। [स्तम्भं नाटयति।]

चतुरिका— [कर्णे] एव्वं विअ। (एवमिव।)

राजा— साधु प्रियसखि! साधु। अतः खलु चतुरिकासि। तेन हि,

करेणादायैनां झटिति पृथुदीर्घेण रभसा-
 न्मृणालीमुत्सन्नामिव मलिननिश्चेष्टकरुणाम्।
समन्तादुद्भूतद्रुमनिबिडदुर्लक्षललितां
 दरीं यास्याम्युच्चैः कलभ इव केलीशिखरिणः॥ २०॥

[तथा करोति।]

देवी— सुक्खदंसिणि! जह! वसंतओ खिण्णो चिट्ठइ तह मण्णे बलिअं अय्यउत्तो खिज्जइ। ता पुच्छ णं। (सूक्ष्मदर्शिनि! यथा वसन्तको खिन्नतिष्ठति तथा मन्ये बलवदार्यपुत्रः खिद्यते। तस्मात् पृच्छैनम्।)

सूक्ष्म-- (निकुञ्जं वीक्ष्य) अम्महे! का उण अवरा। [देवीं दृष्ट्वा वैचित्यं नाटयति।] (अम्महे! का पुनरपरा।)

विदूषकः-- (सभयं) सोत्थि होदीए (स्वस्ति भवत्यै।)

सूक्ष्म-- का एसा। सच्चं भण। (कैषा। सत्यं भण।)

विदूषकः— अहं किं वि ण जाणामि । दाणिं एव्व वसुमईए वअस्सो णिउंजे संगओ । (अहं किमपि न जानामि । इदानीमेव वसुमत्या वयस्यो निकुञ्जे संगतः ।)

देवी— [सरोषा] होदु एसो दाव दुट्ठवाणळो सअळाणत्थमूळं । ता पुढमं गण्णाहि णं । (भवतु एष तावद् दुष्टवानरः सकलानर्थकारणम् । तत् प्रथमं गृहाणैनम् ।)

[सूक्ष्मदर्शिनी तथा करोति ।]

देवी— अय्यउत्त तुह वीसंभसुहविग्घआरिणी णं अहं आअद व्व । [निकुञ्जं प्रविशति ।] (आर्यपुत्र ! तव विस्रंभसुखविघ्नकारिणी नन्वह-मागतैव ।)

राजा— [सहर्षं विहस्य] नन्वद्य मम विस्रंभविशेषकारिणी देवी । येन वसुमतीमात्रसहायश्चिरानियन्त्रितमनोरथानुभवेन जन्म सफलीकरोमि ।

देवी— णत्थि अय्यउत्तो । [चतुरिकां दृष्ट्वा निःश्वस्य सरोषं] वसुमइ कुळपंसणे ळोच्छाळोट्टिणि ! तुमं कहं संतिमदो जणिदासि । (वसुमति कुलपांसने ! प्रसिद्धव्यभिचारिणि ! त्वं कथं शान्तिमतो जातासि)

वसुमती— [आश्वस्य सविषादं] कहं एव्वं मह अपवादो । (कथमेवं ममापवादः ।)

राजा— कृतं सपत्नीवचनविश्वासेन ।

चतुरिका— [स्वगतं] कहं मं एव्व वसुमइं अहिजाणाइ । होदु

एव्वं । [प्रकाशम्] पिदामहीवाहिणि! पणमामि । (कथं मामेव वसुमतीमभिजानाति । भवत्वेवम् । पितामहाभागिनि प्रणमामि ।)

राजा— [सस्मितं] सम्यगतिसन्धीयते चतुरिकया ।

वसु— साहु पिअसहि साहु । हिअअंगमो दे परिहासो । (साधु प्रियसखि! साधु । हृदयंगमस्ते परिहासः ।)

देवी— कअं दुव्विणएण । कहिं मह अय्यउत्तो । सच्चं भण जइ दे पाणा रक्खणिज्जा । (कृतं दुर्विनयेन । क ममार्यपुत्रः । सत्यं भण यदि ते प्राणा रक्षणीयाः ।)

चतुरिका— एत्तिअं जाणामि । जह तुह पदसद्दं सुणिअ एत्थ मं विसज्जिअ सेज्जाघरं गच्छम्मि त्ति परागओ । (एतावज्जानामि । यथा तव पादशब्दं श्रुत्वा अत्र मां विसृज्य शय्यागृहं गच्छामीति परागतः ।)

सूक्ष्म— किं देण दुज्जणेण । एसा खु पाणणाडी करे लग्गा । ता एदं सवसंतअं पुणो वि काराघरं पावेम । (किं तेन दुर्जनेन एषा खलु प्राणनाडी करे लग्ना । तस्मादेतां सवसन्तकां पुनरपि कारागृहं प्रापयावः ।)

देवी— जह रुच्चइ । [निःश्वस्य] कहं मए आगअं कहं वा णिव्वट्टीअदि । (यथा रोचते । कथं मया आगतं कथं वा निवर्त्यते ।)

सूक्ष्म— होदु । गच्छह्म । [निष्क्रामतः] (भवतु गच्छावः ।)

सूक्ष्म— णं पसंसेसि वसुमइं तारिसी ईरिसी त्ति । णं एसव्व

सा (ननु प्रशंससि वसुमतीं तादृशी ईदृशीति । नन्वेषैव सा ।)

[चतुरिका विदूषकं संज्ञापयति ।]

देवी— रोसकलुसिआहिं अच्छीहिं ण रूवं दाणिं गह्णीअदि । (रोषकलुषिताभ्यामाक्षीभ्यां न रूपमिदानीं गृह्यते ।)

सूक्ष्म— पुरा वा तुए वच्छळदाए ण गहीदं । होदु । (पुरा वा त्वया वत्सलतया न गृहीतम् । भवतु ।)

देवी— जं होइ तं होदु । गच्छह्म । (यद् भवति तद् भवतु । गच्छावः ।)

[नायिकानायकवर्जं सर्वे निष्क्रान्ताः ।]

राजा— दिष्ट्या कथमपक्रान्तैव देवी ।

निर्मुक्तामिव राहुणा शशिकलां निध्यायतस्त्वामिह
स्वैरोज्जागरचन्द्रिकाभरपरिष्वक्तेन्दुकान्तोपमम् ।
चेतश्चेतयते न किञ्चन मम स्फारप्रमोदार्णव-
स्रोतोलग्नहृतावमज्जितजडीभूतद्रुतैकीकृतम् ॥ २१ ॥

तदपि तदपि वाच्यं त्वां प्रतीत्यास्त चित्ते
क्रियदिव न विजाने तेषु तेषु क्षणेषु ।
न किमपि मम तस्मिन् बुध्यते चिन्ततेऽपि
स्मितललितमिदानीं पश्यतस्ते मुखेन्दुम् ॥ २२ ॥

[नेपथ्ये]

वैतालिकः— सुखाय सायन्तनी सन्ध्या भवतु देवस्य ।

मानैः साकमिह द्रवन्ति सुदृशां यच्चन्द्रकान्तोपलाः
पान्थानां यदपि स्फुटन्ति कुमुदैः साकं मनांसि क्षणात् ।
उन्मीलन्ति मनोरथाः कुवलयैः साकं च यत् कामिनां
तत् सर्वं मकरध्वजप्रणयिनश्चन्द्रस्य लीलायितम् ॥ २३ ॥

राजा— कथमधुनैव प्रचण्डतमतमस्काण्डलुण्टाकभानुः शीतभानुरुदयाचलशिखरमधिरूढः । तदधुनैव तिमिरलेशानुबन्धिना सिन्धुवारवातेन प्रमदवनान्तरगतं केलीगृहं प्रविशावः । [परिक्रम्य निष्क्रान्तौ ।]

तृतीयोऽङ्कः समाप्तः ।

चतुर्थोऽङ्कः ।

[ततः प्रविशति देवी सूक्ष्मदर्शिनी च ।]

देवी— वसुमइं दट्ठूण काराघरादो पडिणिवुट्टा ह्म । (वसुमतीं दृष्ट्वा कारागृहात् प्रतिनिवृत्तौ स्वः ।) [परिक्रामतः ।]

सूक्ष्म— [अग्रतो भूत्वा] अवि सच्चवअणा तुह्मे सण्हदंसिणी । (अपि सत्यवचना त्वयि सूक्ष्मदर्शिनी ।)

देवी— कहं दाणिं सअळसाहारणं एव्व से सुंदेरं । (कथमिदानीं सकलसाधारणमेवास्याः सौन्दर्यम् ।)

सूक्ष्म— एत्थ का कहंता । णहि सव्वा पोम्मावई । (अत्र का कथन्ता । नहि सर्वा पद्मावती ।)

देवी— मा एव्वं भण । मए खु बाळिआ इअं दिट्ठा । (मैवं भण । मया खलु बालिका इयं दृष्टा ।) [संस्कृतमाश्रित्य]

आनीलभ्रमरकमायतायताक्षं
संरोहद्भिरलविशुद्धदन्तरेखम् ।
नन्वस्या मुखकमलं तदैव चेतः
सस्नेहं व्यतनुत मे ससाध्वसं च ॥ १ ॥

सूक्ष्म— इइ खु लोअगाहा सुणीअदि । (इति खलु लोकगाथा श्रूयते ।) [संस्कृतमाश्रित्य]

प्रायो मतिर्वा रूपं वा यस्य बाल्ये प्रकृष्यते ।
स विपर्ययते ताभ्यां प्राप्ते वयसि यौवने ॥ २ ॥

देवी— जइ एव्वं बिसेसदंसी अय्यउत्तो कहं एदस्सिं रज्जइ । (यद्येवं विशेषदर्शी आर्यपुत्रः कथमेतस्यां रज्यति ।)

सूक्ष्म— अदो एव्व ण रज्जइ । णहु अण्णहा भट्टा पाअपडणावहीरणं वि अणादरिअ वसुमईअवहारिणिं वि तुमं जहपुरुवं अहिअं वा अणुवट्टइ । (अत एव न रज्यति । न खल्वन्यथा भर्ता पादपतनावधीरणामप्यनादृत्य वसुमत्यपहारिणीमपि त्वां यथापूर्वमधिकं वानुवर्तते ।)

देवी— अत्थि एदं । तहवि वारद्अं दिट्ठं वि णं अय्यउत्तो कीस दाणिं आणेइ । (अस्त्येतत् । तथापि वारद्वयं दृष्टामप्येनामार्यपुत्रः कस्मादिदानीमानयति ।)

सूक्ष्म— हुं भट्टिणि! सव्वलोअविदिदं एदं । जं एत्थ वसुमईए आणअणे ण लेसदो वि भट्टा कारणं त्ति । (हुं भट्टिनि! सर्वलोकविदितमेतत् । यदत्र वसुमत्या आनयने न लेशतोऽपि भर्ता कारणमिति ।)

देवी— [सानुस्मरणं] आम सण्हदंसिणि आम । अदो खु अय्यउत्तो तेसु तेसु वीसंभजप्पिदेसु ताए आगमणं कहं कहं त्ति विह्मइ । (आम सूक्ष्मदर्शिनि! आम । अतः खलु आर्यपुत्रस्तेषु तेषु विस्रम्भजल्पितेषु तस्या आगमनं कथं कथमिति विस्मयते ।)

सूक्ष्म— [क्षणं विचिन्त्य सहासं] भट्टिणि! एक्कं दाव मह रुच्चइ । (भट्टिनि! एकं तावन्मे रोचते ।)

देवी— विण्णवेहि । (विज्ञापय ।)

सूक्ष्म— इमं दाव तवस्सिणिं सअं भट्टिणो पअच्छ । (इमां तावत् तपस्विनीं स्वयं भर्त्रे प्रयच्छ ।)

देवी— किं पओअणं । (किं प्रयोजनम् ।)

सूक्ष्म— एक्कं दाव भाइणेअस्स संतिमंतस्स बंधुत्तणं दंसिदं होइ । (एकं तावद् भागिनेयस्य शान्तिमतो बन्धुत्वं दर्शितं भवति ।)

देवी— किं अण्णं । (किमन्यत् ।)

सूक्ष्म— भट्टा वि अणुवट्टिदो होदि । (भर्ताप्यनुवर्तितो भवति ।)

देवी— विरम विरम । बिभेमि अदो वावारादो । (विरम विरम । बिभेम्यतो व्यापारात् ।)

सूक्ष्म— भट्टिणि! कहं भआहि । अणप्पण्णू तुमं । कहं तुमं विअ सा वि वराई भट्टिणो पिआ होदु । (भट्टिनि! कथं बिभेषि । अनात्मज्ञा त्वम् । कथं त्वमिव सापि वराकी भर्तुः प्रिया भवतु ।) [सगर्वं संस्कृतमाश्रित्य] पश्य पश्य,

तावत्सममाद्रियते कृतकः स्वाभाविकोऽपि मणिः ।
एकस्मिन्नपवरके यावन्नो वेक्ष्यते युगपत् ॥ ३ ॥

तेण हि विसेसादो तुइ भट्टिणो पणओ होदि । (तेन हि विशेषात्त्वयि भर्तुः प्रणयो भवति ।)

देवी— जह रुच्चइ । (यथा रोचते ।)

सूक्ष्म— जइ महग्घाइ तुह भूसणाइ वसुमईए दाऊण ताए भूसणेहिं अप्पाणं अळंकरोसि तदो भट्टा अच्चंतं अणुवट्टिदो होदि ।

बहिणीघरसदंतत्तणं वि दंसिदं होदि । (यदि महार्घाणि तव भूषणानि वसुमत्यै दत्त्वा तस्या भूषणैरात्मानमलङ्करोषि ततो भर्ता अत्यन्तमनुवर्तितो भवति । भगिनीगृहस्वतन्त्रत्वमपि दर्शितं भवति ।)

देवी— कहं एत्थ वि दे ण सज्झसं । (कथमत्रापि ते न साध्वसम् ।)

सूक्ष्म— णहि भूसणतदभावेहिं सुंदेरं असुंदेरं वा होदि । पेक्ख—

बद्धफळप्पसूणा वि कोहळ्ळी ण हि सोहणा ।
णीहळा पंकदिद्धा वि बिसिणी एव्व सोहणा ॥ ४ ॥

(नहि भूषणतदभावाभ्यां सौन्दर्यमसौन्दर्यं वा भवति । पश्य—
बद्धफलप्रसूनापि कूश्माण्डी नहि शोभना ।
निष्फला पङ्कदिग्धापि बिसिन्येव शोभना ॥)

देवी— एव्वं होदु । (एवं भवतु ।)

[निष्क्रान्ते ।]

प्रवेशकः ।

[ततः प्रविशति राजा ।]

राजा—

सुभिक्षसुखिताः प्रजाः प्रशमितोपसर्गा मही
विनैव धनुषारयो विनयभारनम्रा मयि ।
तपोभिरपि दुर्लभा वसुमती च लब्धा मया
ततः खलु चराचरेष्वहमिह प्रकृष्येतराम् ॥ ५ ॥

[सोत्कण्ठं] यदि चतुरिकावसन्तकाभ्यामपि संगतः स्यां ततः प्रकृष्टतमः स्याम् ।

[ततः प्रविशति विदूषकः ।]

विदूषकः— [सानन्दमुपसृत्य] सोत्थि होदे । (स्वस्ति भवते ।)

राजा— दिष्ट्या वसन्तकः सम्प्राप्तः । कथं देव्या बन्धनान्मुक्तोऽसि ।

विदू— ण केवळं अहं एव्व । (न केवलमहमेव ।)

राजा— किन्तु ।

विदू— चउरिआ अ । (चतुरिका च ।)

राजा— अहो मयि प्रसादो देव्याः । तत् प्रियात् प्रियं नः । क्व तर्हि सा प्रियतमायाः सखी ।

विदूषकः— णं सा वि आगदव्व । (ननु साप्यागतैव ।)

[नेपथ्ये]

वैतालिकः— विजयतां निशारम्भेण देवः ।

या किल पुरा नभःश्रीरपि सन्तप्ता इशोरभूत् परुषा ।
उडुतिमिरमण्डितासौ वेषान्तरिता सुखाकुरुते ।। ६ ।।

[ततः प्रविशति चतुरिकावेषधारिणी देवी ।]

देवी— अज्ज दाव पमदवणंतरगअं अय्यउत्तं दट्ठूण वसुमइं से देमि । [उपसृत्य] वड्ढइ भवं एदिणा अय्यवसंतएण । (अद्य तावत्

प्रमदवनान्तरगतं देवं दृष्ट्वा वसुमतीमस्मै ददामि। वर्धते भवानेतेनार्य-वसन्तकेन ।)

राजा — [सहर्षोल्लासं] ननु त्वमप्यागतेत्यपर्याप्तिः प्रमोदस्य। तदहमेव तव सख्यै वयस्यागमोत्सवशंसी भवामि।

देवी— [आत्मगतं] अदिसंधिदह्मि। अण्णा सा वसुमई। मए उण से एव्व सही वसुमइ त्ति मण्णिअ काराघरम्मि ठाविआ। हुं धुत्तो अय्यउत्तो। तं एव्व दाव गह्णिअ आगमिस्सं। [प्रकाशं] अहं झत्ति गदुअ दक्खिस्सं। (अतिसन्धितास्मि। अन्या सा वसुमती। मया पुनरस्या एव सखी वसुमतीति मत्वा कारागृहे स्थापिता। हुं धूर्त आर्यपुत्रः। तामेव तावद् गृहीत्वा आगमिष्यामि। अहं झटिति गत्वा द्रक्ष्यामि।)

राजा— रम्यमेतदपि। तद् गम्यताम्।

देवी— कहिं मे पिअसही। (कुत्र मे प्रियसखी।)

राजा— पश्चिमे वकुळवाटिकायाः शय्यागृहे।

देवी— [आत्मगतं] वंचअं वि अय्यउत्तं तह वंचेमि दाव णं जह से हिअअं जाणिस्सं। [प्रकाशं] अवि ण मे पिअसही मए विणा मिळाएदि। (वञ्चकमप्यार्यपुत्रं तथा वञ्चयामि तावदेनं यथास्य हृदयं जानामि। अपि न मे प्रियसखी मया विना ग्लायति।)

विदूषकः— सा कहं मिळाएदु। जा महाराअपरिग्गहेण पडिदिणं सोत्थिवाअणं खादेइ। (सा कथं ग्लायतु या महाराजपरिग्रहेण प्रतिदिनं स्वस्तिवायनं खादति।)

राजा— ननु च सा मया त्वद्विरहखेदविस्रंसनाय सर्वदा सान्निध्यीयते ।

विदूषकः— णं कदिबाहेहिं दिअहेहिं वअस्सो ताए चेडत्तणं वि अणुभविस्सदि । (निश्चितं कतिपयैरेव दिवसैर्वयस्यस्तस्याश्चेटत्वमप्यनुभविष्यति ।)

देवी— अदिक्कमं मंतेसि । (अतिक्रमं मन्त्रयसे ।)

राजा— कः पुनरत्रातिक्रमः ।

प्रेयान् प्राणा बन्धुता वा सखी वा
धात्री चेटी वामनः कुब्जको वा ।
यस्मिन् काले यद्यदिष्टं तदानीं
तत्तत् सर्वं सैव मेऽहं च तस्याः ॥ ७ ॥

देवी— [आत्मगतं] ता अहं किं त्ति अप्पाणं धारेमि । (तस्मादहं किमित्यात्मानं धारयामि ।)

विदूषकः— सीमा दे पणअस्स । कहं एव्वं आरूढो से तुयि पणओ । (सीमा ते प्रणयस्य । कथमेवमारूढोऽस्यास्त्वयि प्रणयः ।)

राजा— अस्यास्त्वयीति भेदगर्भं व्यवहारं न सा मृष्यते ।

देवी— [आत्मगतं]अहं उण ईरिसाणि कण्णसल्लाणि मरिसेमि । [प्रकाशं] भट्ट सा तवस्सिणी कहं देवीरंजिदस्स तुह्म पिआ होदु । (अहं पुनरीदृशानि कर्णशल्यानि मर्षयामि । भर्तः सा तपस्विनी कथं देवीरञ्जितस्य तव प्रिया भवतु ।)

राजा— चतुरिके! मा मैवम् ।

दृष्टा दृष्टा नवनवमियं विस्मयं निर्मिमाणा
स्पर्शे स्पर्शे भवति शिशिरा कापि काप्यङ्गकेषु ।
कालेनास्याः प्रणयवचनैर्मद्गतं वीक्ष्य रागं
मन्ये देवीं प्रणयरहितां त्वद्वयस्यामपेक्ष्य ॥ ८ ॥

देवी— [आत्मगतं] कहं ईरिसं सुणंती एव्व एत्थ चिट्ठामि । (कथमीदृशं शृण्वत्येवात्र तिष्ठामि ।)

विदूषकः— किं तुमं इत्थंगए वि देविं अणुसरसि । सा वा तुमं अणुरत्तं मण्णेदि । (किं त्वमित्थंगतेऽपि देवीमनुसरसि । सा वा त्वामनुरक्तं मन्यते ।)

देवी— [स्वगतं] इदं दाव सोदव्वं सुणिअ गमिस्सं । (इदं तावच्छ्रोतव्यं श्रुत्वा गमिष्यामि ।)

राजा—

यथायथास्यामुपचारकल्पने
विधिर्मयाभूद्विहितः पुरा चिरात् ।
तथा ततो वाधिकमद्य रच्यते
मया मयीयं च ततोऽपि रज्यति ॥ ९ ॥

विदूषकः— वअस्स दक्खिणो खु सि । (वयस्य दक्षिणः खल्वसि ।)

देवी— [आत्मगतं] सच्चं एदं । (सत्यमेतत् ।)

राजा— किं बहुना। देव्यास्तेषु तेषु विस्रम्भजल्पितेषु मद्गत-रागमालक्ष्य भवति मे निश्चयः।

देवी— [स्वगतं] एदं वि सुणिअ दाव गमिस्सं। (एतदपि श्रुत्वा तावद् गमिष्यामि।)

विदूषकः— कहं विअ। (कथमिव।)

राजा— पञ्चषैर्दिवसैः स्वयमेव प्रतिपादयिष्यति वसुमतीमिति।

विदूषकः— अह्मो! सा एव्वं भावसुण्णं वि तुमं अजाणिअ सरळहिअआ कहं अणुवट्टइ। (अहो! सा एवं भावशून्यमपि त्वामज्ञात्वा सरलहृदया कथमनुवर्तते।)

देवी— [आत्मगतं] साहु वसंतअ साहु। (साधु वसन्तक साधु।)

राजा— [सकोपं] अयि चतुरिके! कथमेष मां भावशून्यमस्यां समर्थयते। पश्य—

सत्यं प्राणादपि तव सखी प्रेयसी यत्तथापि
काप्येतस्मिन् प्रमदवनिकामण्डपे स्थापितास्ते।
देव्या नैसर्गिकगुणगणप्रासमूलादमुष्मि-
न्नन्यत् किं वा परिचयदृढात् कारणं रागबन्धात् ॥१०॥

देवी— [आत्मगतं] विसमहूसारपूरिदविसमपेसळो से उवण्णासो तरळावेइ मे हिअअं। [प्रकाशं] महाराअ! दाणिं से देवीए समाणराअत्तणं पत्थीअदि। (विषमध्वासारपूरितविषमपेशलोऽस्योपन्यासस्तरलयति मे हृदयम्। महाराज! इदानीमस्या देव्याश्च समानरागत्वं प्रार्थ्यते।)

राजा — अयि कातरे! अधिकमासाद्य किं प्रार्थयसे।

देवी — णत्थि मे पडिवअणं। [आत्मगतम्] पुणोवि ताए एव्व अहिणिविट्ठो। [प्रकाशम्] ताए दंसणम्मि मे काळो खिवीअदि। (नास्ति मे प्रतिवचनम्। पुनरपि तस्यामेवाभिनिविष्टः। तस्या दर्शने मे कालः क्षिप्यते।)

राजा— तेन हि त्वरितं गम्यताम्।

देवी— [परिक्रामन्ती आत्मगतम्] एदं अच्चरिअं काए कहइस्सं। होदु। अदिभीसणे चिंचावणम्मि एदं ठावेमि। (एतदाश्चर्यं कस्यै कथयिष्यामि। भवतु। अतिभीषणे चिञ्चावने एतां स्थापयामि। [त्वरितपदं निष्क्रान्ता।]

राजा— अत्युत्सुका सखीदर्शने चतुरिका[1]। तदुभे अपि परस्परदर्शनानन्दमनुभवताम्। अहं तावदेवं कृतप्रसादां देवीमभिष्टोतुमुपयामि। गच्छाग्रतः।

विदूषकः— इदो इदो भवं। (इत इतो भवान्।)

[परिक्रामतः।]

[ततः प्रविशति कृतदेवीलक्षणा चतुरिका।]

चतुरिका — अवि पुरोगअं देविं परमत्थदो मं मुणिअ ण राआ रहस्सहेदं करेदि। अविणाम पिअसहिं दक्खिस्सं। (अपि पुरोगतां देवीं परमार्थतो मां ज्ञात्वा न राजा रहस्यभेदं करोति। अपिनाम प्रियसखीं

---

१. 'का। उभे' ख.

द्रक्ष्यामि ।) [उपसृत्य] जेदु भट्टा । (जयतु भर्ता ।)

राजा— किं दासजनेऽपि भर्तरित्यकारणनिष्ठुरं वचनम् ।

चतुरिका— का एत्थ देवी । णं चउरिआ अहं । (कात्र देवी । ननु चतुरिकाहम् ।)

राजा— हा! कथं पूर्वमागता देवी । अहं वञ्चितोऽस्मि तिमिरैस्तव भूषणैश्च ।

चतुरिका— [ससंभ्रमम्] चिट्ठदु एदं । अवि कहिअं वसुमई-वासघरं वि देवीए । (तिष्ठत्वेतत् । अपि कथितं वसुमत्या वासगृहमपि देव्यै ।)

राजा— [सास्रम्] किं भणामि मन्दभाग्यः ।

विदूषकः— किं पुच्चसि[1] । सारिअं वड्ढिऊण मज्जारस्स दिण्णवंतो एसो । (किं पृच्छसि । शारिकां वर्धयित्वा मार्जाराय दत्तवानेषः ।)

[प्रविश्य पटाक्षेपेण प्रतीहारी]

प्रतीहारी— भट्टा! हदा । भट्टा! हदा । (भर्तः! हता भर्तः! हता ।)

चतुरिका— काए का । (कया का ।)

प्रतीहारी— देवीए वसुमई । (देव्या वसुमती ।)

राजा— [सभयम्] हन्त! किं मारितां वदसि ।

प्रतीहारी— अवणीदत्ति विण्णवेमि । [अपनीतेति विज्ञापयामि ।

---

१. 'पुच्छसि' ख.

राजा— [किञ्चिदाश्वस्य सास्रम्]

आसादिता वसुमती परिरक्षिता च
यत्नेन देव्यपि मया किल रञ्जितास्ते।
तेनाहमुच्छ्वसिमि किञ्चिदिवेति वर्ते
हा! दारुणो विधिरुपक्रमतेऽन्यदेव ॥ ११ ॥

विदूषकः— एस णवणीदुब्भेदकाळे जोत्तविच्छेदो । [एष नवनीतोद्भेदकाले योक्त्रविच्छेदः ।]

प्रतीहारी— [पुरो विलोक्य] को एत्थ । [निरूप्य] भट्ट कळिंगणअरादो पच्चागओ कंचुई । (कोऽत्र । भर्तः कलिङ्गनगरात् प्रत्यागतः कञ्चुकी ।)

राजा— आगच्छतु ।

प्रतीहारी— तह । (तथा ।) [इति निष्क्रान्ता ।]

[प्रविश्य कञ्चुकी]

कञ्चुकी— जयतु महाराजः ।

राजा— का तत्र ज्वालावत्याः प्रवृत्तिः ।

कञ्चुकी— किं विज्ञापयामि मन्दभाग्यः । सा किल निसर्गपरुषा कथमपि स्वामिनमुपस्थितां वसुमतीमधिगत्य कृत्याप्रयोगेन त मारयामीति वर्तते ।

राजा—अहह! घर्मतप्तस्य वनस्पतेरयमशनिघातः [मूर्च्छति ।]

कञ्चुकी— भट्ट! समस्ससिहि । समस्ससिहि । (भर्तः! समाश्वसिहि । समाश्वसिहि ।)

राजा— [आश्वस्य] अयि कठिने ! किमिति संज्ञां लम्भयसि ।

देव्या प्रागपहारयन् प्रियतमामन्तर्दुरन्तोदय-
दुधूमोत्पीडनिपीडितः शिवशिव ! क्रूराभिरस्योक्तिभिः ।
नन्वद्याहमकाण्डचण्डपवनव्यावर्तनोद्वर्तित-
क्रूरान्तर्दहनस्य कोटरतरोरौपम्यमासादये ॥ १२ ॥

चतुरिका— किं दाणिं । जदा जाळावईभवणम्मि पसूदा तआणिं एव्व सा णत्थि (किमिदानीम् । यदा ज्वालावतीभवने प्रसूता तदानीमेव सा नास्ति ।)

विदूषकः— किं दाणिं अरण्णरुदिएण । चिंतेहि दाव करणिज्जं । (किमिदानीमरण्यरुदितेन । चिन्तय तावत् करणीयम् ।)

राजा— किमत्र चिन्तनीयमस्माभिः । अस्याः समागमोऽपि यदधीनः स एव देवश्चिन्तयतु ।

चतुरिका— सच्चं एत्थ समाअमे तुह्मे ण काळणं । (सत्यमत्र समागमे यूयं न कारणम् ।)

राजा— अथकिम् ।

चतुरिका— ता एव्वं चिंतेमि । (तस्मादेवं चिन्तयामि ।)

राजा— कथमिव ।

चतुरिका— सुणीई एत्थ कदाइ काळणं भवे । (सुनीतिरत्र कदाचित् कारणं भवेत् ।)

विदूषकः— [आत्मगतम्] रसंतरेण एसा समासासणं करेदि। (रसान्तरेणैषा समाश्वासनं करोति।)

राजा— [सशिरःकम्पम्] सम्भाव्यते तस्मिन्।

विदूषकः— [आत्मगतम्] अक्खिवामि दाव णं। [प्रकाशम्] जइ एव्वं सो एत्तिअं उवआरं कहं ण कहेइ। (आक्षिपामि तावदेनम्। यद्येवं स एतावन्तमुपकारं कथं न कथयति।)

राजा— मा मैवम्।

दुष्कार्यात् प्रभुवन्निवर्तयति मामुक्त्वाप्यसावप्रियं
कर्तव्ये गुरुवत् प्रवर्तयति च प्रोत्साहयन्नुक्तिभिः।
नीत्या नीतिविदां दुरापमपि यत् तन्मे करोतीप्सितं
न ब्रूते तु बलाद् ब्रुवन्नपि फलं ब्रूते न तु स्वार्जितम् ॥१३॥

[प्रविश्य दौवारिकः]

दौवारिकः— देव! सुणीई पडिहारे चिट्ठइ। (देव! सुनीतिः प्रतीहारे तिष्ठति।)

राजा— जाल्म! किमस्याहमनुपगम्यः कदाचित्। झटिति प्रवेश्यताम्।

दौवारिकः— तह। (तथा) [इति निष्क्रम्य तेन सह प्रविश्य] इदो इदो भवं। (इत इतो भवान्।) [परिक्रामतः।]

सुनीतिः—

काले वृष्ट्या भवति धरणी सस्यमालिन्यशेषा
दत्ते चास्मै करमरिचमूर्नाममात्रेण भीता।

स्वे स्वे कर्मण्यवहितधियः सर्व एवाद्य जाता-
स्तत् किं यत् स्यादनधिगतमस्याधिगम्यं परेण ॥ १४ ॥

तथापि सन्ततशुभसंवेदनायैवास्य मन्त्रिणः । अहो! कुमारवीरसेनोऽपि स्वामिनमनु जातः । [उपसृत्य] दिष्ट्या दानवविजयिना कुमारवीरसेनेन विजयते देवः ।

राजा — सुनीते! किमिदानीमकृतपूर्वकं ते बहुमानं करिष्ये । केवलं परिरभे । [परिरभते ।] उपविश कुमाराध्युषिते भद्रपीठे ।

चतुरिका— जुज्जइ । जुज्जइ । (युज्यते । युज्यते ।)

सुनीतिः— कथमतिस्नेहादतिक्रमोऽपि ।

शास्त्याचार्यः कुरु सुचरितानीति दत्ते न लक्ष्मीं
लक्ष्मीं दत्ते सति सुचरिते दैवतं नैव शास्ति ।
सत्कर्माणि प्रतिदिनमनुष्ठाप्य लक्ष्मीं ददानो
राजामात्यैरुभयविधया तत्कथं नार्चनीयः ॥ १५ ॥

विशिष्य जन्मतः कुलतो वा राजैकोपजीविभिरस्मादृशैः । तदुपविशामि निजासन एव । [राजा बलात् कुमारासने उपवेशयति ।]

चतुरिका— अहो! बहुमाणो । (अहो! बहुमानः ।)

राजा — किमुच्यते बहुमान इति ।

राज्यं द्विधा विभक्तं सम्पत् तत्साधनं च मन्त्र इति ।
मन्त्रिण्यवन्ध्यमन्त्रे राजानं सम्पदाश्रयति ॥ १६ ॥

सुनीतिः— कुमारवीरसेनस्य दैत्यविजये मन्त्रिणा किं क्रियते ।

राजा— किं कुमारेण स्वहस्ताक्षरलाञ्छितो लेखः प्रहितः ।

सुनीतिः— नहि नहि ।

राजा— किन्तु ।

सुनीतिः— संक्रन्दनेन मातलिमुखेन वाचितो विजयः ।

राजा— अहो भगवतः संक्रन्दनस्यापि अस्मासु मानुषमात्रेषु बहुमानना ।

विदूषकः— अह्मो ! अणुसरणं वि दे बहुमाणणा । (अहो अनुसरणमपि ते बहुमानना ।)

सुनीतिः— साधु वसन्तक साधु । अहो! कथमनुत्सेको देवस्य । किमनेनापि बहुमन्यते देवः । यस्मै किल वत्सो वीरसेनः,

यावद् दानवनायकैर्विमथिते सैन्ये द्रुतेष्वन्यतो
दिक्पालेषु भयाकुलः किमपरं जज्ञे वृषापि स्वयम् ।
कल्पान्तात्रिपुरान्तकप्रतिभयक्रूरां दधानो दशां
तावत् तानपजित्य दानवभटान् राज्यं पुनः प्रादित ॥१७॥

राजा— इदं तावदावेदनीयं देव्यै ।

विदूषकः— पुच्छामि दाव णं । (पृच्छामि तावदेनम् ।)

सुनीतिः – कथमिव ।

राजा— वसुमत्यागमने कारणम् ।

सुनीतिः— नन्वत्र प्रभाव एव देवस्य । यन्मलयकेतुना बिलनिर्माणेनेयमानीता ।

राजा—

न यत्र व्यापर्तुं प्रभवति मही राज्यमखिलं
न सेना वा शश्वद्विजयिरथनागाश्च कलिलाः ।
न वा हव्यद्वैत्यच्छिदुरशरधारं धनुरिदं
तमप्यर्थं सिद्धं दिशति तव नीतिः कथमहो ॥ १८ ॥

सुनीतिः—

नीतिं प्रागुपदिश्य साधु फलमप्युत्पाद्य संयोजय-
त्येनां तेन ततो दिशत्यपि यशो भृत्यः सुमेधा इति ।
भर्तुः कापि दयैव भृत्यविषये पर्यायसञ्चारिणी
यद्येवं सचिवान् क्रियाफलगुणैः प्राज्ञः प्रशंसेत् कथम् ॥ १९ ॥

चतुरिका— अह्मो ! विणअगरुओ से उवण्णासो । किं एत्थ उइदं बहुमण्णेदि से भवं । (अहो ! विनयगुरुकोऽस्योपन्यासः । किमत्रोचितं बहुमन्यतेऽस्य भवान् ।)

राजा— कस्य वा स्वस्मिन्नेव स्वोपकारिणि बहुमानः ।

चतुरिका— सीमा बहुमाणस्स । (सीमा बहुमानस्य ।)

कञ्चुकी— तदपि देव आज्ञापयतु ।

सुनीतिः— आज्ञापयतु देवः ।

राजा— इदमशक्यं मया वक्तुम् ।

कञ्चुकी— निवेदयामि मन्दभाग्यः। (कर्णे) एवमिव।

सुनीतिः— तत्रापि प्रभावदृष्टकृत्याप्रसङ्गो मघवा तत्प्रतिहर्तारं प्रत्यङ्गिरसमादेक्ष्य इति आज्ञाप्तवान्।

राजा— अहो! कियदुपक्रियते भगवता महेन्द्रेण।

चतुरिकावसन्तकौ— दाणिं जीविदह्म। (इदानीं जीवितौ स्वः।)

सुनीतिः— देव! पौरजानपदाः प्रतिपालयन्ति दर्शनं देवस्य।

राजा— त्वयैव कृतकार्याः क्रियन्ताम्। नन्वहं परिश्रान्तः संस्त्यायं प्रविशामि।

सुनीतिः— यदाज्ञापयति देवः। [इति निष्क्रान्तः।]

राजा— चतुरिके! पुत्रविजयं तावद् देव्यै निवेदयिष्यामि।

चतुरिका— ता सव्वं सुविहिदं भवे। (तस्मात्सर्वं सुविहितं भवेत्।)

[परिक्रम्य निष्क्रान्ताः सर्वे।]

चतुर्थोऽङ्कः समाप्तः॥

पञ्चमोऽङ्कः ।

[ततः प्रविशति भीषणोद्धतगतिः कृत्या ।]

कृत्या— अहो ! गृहं ।

तथा निषिध्यमानापि मया ज्वालावती कथम् ।
बलात् प्रवर्तयत्येव पौत्रीं व्यापादयेति माम् ॥ १ ॥

यद्येकान्तरिता प्रिया न भगिनी बन्धोस्तनूजात्मजा
कन्यानाशविनाश्ययं तु न कथं चित्ते तनूजः स्थितः ।
आस्तामेतदपि प्रियाविरहतः पत्यौ विपत्तिं गते
शोचन्ती भगिनी च सैव न कथं तस्या मनस्यागता ॥ २ ॥

एवमनपेक्षितोदर्कनिसर्गपरुषचित्तवृत्तेरस्याः कृते तपस्विनीं वसुमतीं व्यापादयन्त्या मया शक्यं मरणमप्यनुभवितुम् । अथवा कृतं दयया ।

साधकस्य यदि मे मनोरथः पूर्यते कथमपि क्रियेत तत् ।
ताडनं सपदि मारणं च वा प्रेयसोऽपि वपुषि स्व एव वा ॥ ३ ॥

[आकाशे]

एवमेतत् ।

कृत्या— [सभयं] अयि ! कः । [निरूप्य] न कश्चिदत्र । [सावष्टम्भम्] मन्ये देवता अनुजानन्ति माम् । तदिदानीमहम्,

अज्ञातोपेत्य सद्यः सविधभुवि भयाद् दीर्यमाणोरसोऽस्याः
सद्यो निष्ठ्यूतमुद्बुद्बुदमुपरिवलत्फेनमाविस्रमांसम् ।

पीत्वा पीत्वा तदान्त्रग्रथितकरपदास्याब्जमाल्या गता स्वां
ज्वालावत्या मदाकर्षणभजनविधेर्नूनमानृण्यमेवम् ॥ ४ ॥

[अवलोक्य सानन्दम् ।] प्रवृत्त एव दारुणः सन्ध्यासमयः ।

प्रेतादद्य चिताग्नितप्तविकटव्यात्ताग्रगर्तात् क्वथ-
न्निर्यान्तं गळवर्त्मना बहिरसृक्पूयं यदाभ्यन्तरम् ।
संवर्ताम्बुदवर्तिदारुणतटिद्व्यालोलदीर्घारुणै-
र्वेताळा रसनाञ्चलैस्तदधुना गृह्णन्त्युदन्याकुलाः ॥ ५ ॥

तदमीभिरात्मपक्षीयैः सम्भूय यावदध्वश्रमं विनयामि । [निष्क्रान्ता ।]

विष्कम्भः ।

[नेपथ्ये]

कहिं दाव भट्टारं दक्खिस्सं । (कुत्र तावद् भर्तारं द्रक्ष्यामि ।)

[ततः प्रविशति चतुरिकावसन्तकाभ्यामन्वास्यमानो राजा पौरजनश्च ।]

राजा— अपि सत्यमेतत् ।

चतुरिका— अळं अण्णहा संभाविअ । (अलमन्यथा संभाव्य ।)

राजा— कथमियानुपकारः कर्तुमध्यवसितो देव्या ।

चतुरिका— तुह्माणं एरिसं वसुमईए पणअं तह वि ताए विणअं अप्पाणम्मि दिढअरं अ तुह्म पणअं सअं एव्व तुह्म वीसंभवअणेहिं सुणिअ जाव पच्चुप्पण्णपच्छइदावा अप्पणा वसुमइं पडि-

वादेमि त्ति वट्टइ दाव तुम्ह एव्व मुहादो पुत्तविअअमहूसअं सुणिअ पारिदोसिअदाणव्ववदेसेण तं एव्व वाआए दिण्णवई । (युष्काकमेतावन्तं वसुमत्यां प्रणयं तथापि तस्या विनयम् आत्मनि दृढतरं च युष्मत्प्रणयं स्वयमेव युष्मद्विस्रम्भवचनैर्ज्ञात्वा यावत्प्रत्युत्पन्नपश्चात्तापा आत्मना वसुमतीं प्रतिपादयामीति वर्तते तावद् युष्माकमेव मुखात् पुत्रविजयमहोत्सवं श्रुत्वा पारितोषिकदानव्यपदेशेन तामेव वाचा दत्तवती ।)

राजा— [सानन्दम्] दिष्ट्या वर्धसे ! (विचिन्त्य वैचित्यं नाटयन्) तत् किमिति,

किमु शोकः किमु मोहः किमु मूर्च्छा महा(रुजा)रम्भः ।
अयमित्यनवधृतो मे हृदयमवस्कन्द्य संवृणुते ॥ ६ ॥

विदूषकः— अविहा अविहा । (अपिहा अपिहा ।)

[नेपथ्ये कळकळः । चतुरिका वैक्लब्यं नाटयति ।]

राजा— किमेतत् । धनुर्धनुः ।

परिजनेषु केचित्— इदमानीयते । [इति निष्क्रान्ताः ।]

राजा—

संवर्तक्रुद्धरुद्रप्रतिभयनयनक्रूरदीप्रप्रकाशं
किञ्चिद् दृष्ट्वापि लोकैः प्रतिहतनयनैर्लक्ष्यमाणं तमोवत् ।
आयात्यस्मिन् निशान्तं

[नेपथ्ये]

पापे! नन्वद्य मया हतासि । तत् क्षणमात्रसुलभजीवना लुण्ठ तावत् ।

परिजनः— झटिति पुनरप्यैत्यभ्रमार्गेण हाहा

राजा— [सानुसरणं]

पापे ज्वालावति! त्वं हरसि मम कथं भाग्यरेखां च मां च ॥

[प्रविश्य पटाक्षेपेण प्रतीहारी]

प्रतीहारी— णत्थि चिंचावणम्मि वसुमई । (नास्ति चिञ्चावने वसुमती ।)

राजा— हा तदेवाशङ्कितम् । [मूर्च्छति ।]

चतुरिका— [सास्रम्] समस्ससिहि समस्ससिहि । (समाश्वस समाश्वस ।)

राजा— [आश्वस्य]

आपन्ना शरणार्थिनी तत इतो विद्राव्य रक्षेति मां
क्रन्दन्त्येव हताशया मम कृते त्वं कृत्यया मार्यसे ।

[विमृश्य] दूरे तावदेतत् ।

तां दृष्ट्वैव हठाद् निदीर्णहृदया भीरुर्गता पञ्चतां
तत् कृत्यां प्रतिहन्मि शान्तमथवा हत्वाप्यतः किं फलम् ॥८॥

[सास्रं निःश्वस्य]

कान्तारे गिरिकन्दरे जलनिधेर्गर्भेऽपि नौकासु वा
यन्नामग्रहणेन मुञ्चति जनः पान्थोऽपि सर्वं भयम् ।
तस्यैव प्रियया तदीयभवने तस्यैव हेतोः कथं
प्राप्तो मृत्युराकाण्डवज्रपरुषो दृष्टश्च तेन स्वयम् ॥ ९ ॥

[प्रविश्य परिजनः]

परिजनः— इदं धनुः । [उपनयति ।]

राजा— अयि भोः! अतिपन्ने किं धनुषा । [परिजनः ससाध्वसमपक्रामति ।]

चतुरिका— भट्ट अज्ज वि दुल्लहदंसणा पिअसहि त्ति भणिदुं ण णीसरंति जीहादो अक्खराइं । (भर्तः! अद्यापि दुर्लभदर्शना प्रियसखीति भणितुं न निस्सरन्ति जिह्वातोऽक्षराणि ।)

राजा— किमत्र विस्मयसे ।

अशनमनशनं वा भाषणं मौनिता वा
गमनमगमनं वा हृष्टता दुःखिता वा ।
ननु चिरमविशिष्टं ते च तस्याश्च सर्वं
जननसमयमारभ्यैतदन्तं किलासीत् ॥ १० ॥

चतुरिका— णासिअवसुमईए वि एदअंतं ति वअणं कंपेइ हिअअबंधं । [मूर्च्छति ।] (नाशितवसुमत्या अप्येतदन्तं वचनं कम्पयति हृदयबन्धम् ।)

राजा— [निर्वर्ण्य] हन्त! कियत्किल मयोपक्रियते वसुमत्याः । अये समाश्वसिहि समाश्वसिहि । प्रियतमासखीमपि तावदाश्वास्य सम्भावयामि । अथवा प्रियतमेति तामालपामि किं निर्लज्जः ।

चतुरिका— [आश्वस्य] हा पिअचउरिए! कहिं सि । पिअसहि! मं उवक्खिअ पडिट्ठसि । अहं वि जाव अणुसरेमि । अहव किं दाणिं अणुसरन्तीए वि मए जा ताए किचाए णिब्भच्छिअमाणाए तुज्झ

सज्झसद्धभाइणी ण होमि । (हा प्रियचतुरिके ! कुत्रासि । प्रियसखीं मामुपेक्ष्य प्रतिष्ठसे । अहमपि यावदनुसरामि । अथवा किमिदानीमनुसरन्त्यापि मया या तया कृत्यया निर्भर्त्स्यमानायास्तव साध्वसार्धभागिनी न भवामि ।)

राजा— हा प्रिये वसुमति ! लोकान्तरगतायां त्वयि नाद्य मे दयितावधपातकिनो मरणदण्डः । किन्तु दुष्करं त्वद्विरहित एव क्षणमपि यदत्र लोके जीवामि । [मूर्च्छति ।]

विदूषकः— वारं वारं मुच्छन्तो पिअवअस्सो कहं मए दट्ठव्वो । हा जाळावइ ! एव्वं सि तुमं । वअस्स ! समस्ससिहि समस्ससिहि । वीजेह[1] दाव परिजणा ! । (वारं वारं मूर्च्छन् प्रियवयस्यः कथं मया द्रष्टव्यः । हा ज्वालावति ! एवमसि त्वम् । वयस्य ! समाश्वसिहि समाश्वसिहि । वीजयत तावत् परिजनाः ! ।)

[परिजनस्तथा करोति ।]

चतुरिका— कहं अज्ज वि ण पच्चागअजीविदो भट्टा । हा देव्व दारुण ! एदं वि दाव दंसेदुं पिअसहीए विणा खणमेत्तं मं जीवावेसि । (कथमद्यापि न प्रत्यागतजीवितो भर्ता । हा दैव दारुण ! एतदपि तावद् दर्शयितुं प्रियसख्या विना क्षणमात्रमपि मां जीवयसि ।)

[राजा आश्वस्य मुखमपिधाय रोदिति ।]

विदूषकः— किं एदं । विचिणुम दाव पिअसहिं । (किमेतत् । विचिनुमस्तावत् प्रियसखीम् ।)

राजा— दुर्लभदर्शना सा ।

---

१. ‘ वीजेहि ’ ख.

विदूषकः— कदाइ भीदिमुच्छिअं वि मारिअं मण्णिअ णिवट्टेइ किच्चा । (कदाचिद् भीतिमूर्च्छितामपि मारितां मत्वा निवर्तते कृत्या ।)

राजा— का प्रसक्तिः ।

चतुरिका— ताए सरीरं वि दाव दक्खिस्सं (तस्याः शरीरमपि तावद् द्रक्ष्यामि ।)

राजा— कथं हि नामैतत् । क्षममत्रैव स्थितेन मया लोकान्तरमुपगन्तुम् ।

चतुरिका— ताए अदंसणं वि संदावकाळणं होदि । (तस्या अदर्शनमपि सन्तापकारणं भवति ।)

राजा— जीवत एतत् ।

चतुरिका— ता मं एव्व मंदभाइणिं दुळ्ळहमरणमहोसवं ताए सरीरेण समं एक्कचिअं पाविअ डज्झउ भट्टा जइ किच्चाए अभक्खिआ होइ । एदं एव्व अपुव्वं भट्टा मए पत्थीअदि । [इति पादयोः पतति ।] (तस्मान्मामेव मन्दभागिनीं दुर्लभमरणमहोत्सवां तस्याः शरीरेण सममेकचितां प्रापय्य दहतु भर्ता यदि कृत्यया अभक्षिता भवति । एतदेवापूर्वं भर्ता मया प्रार्थ्यते ।)

परिजनः— हा विधे! दारुणः खल्वसि ।

राजा— अयि कठिने! किमेतदपि प्रार्थयसे । नन्वेतदावयोरनुक्तसिद्धमविशिष्टं च ।

चतुरिका— [सहर्षम्] जुत्तं एदं । सरिसं एदं । (युक्तमेतत् । सदृशमेतत् ।)

राजा— तद् गच्छाग्रतः ।

चतुरिका— इदो इदो भवं । (इत इतो भवान् ।) [शिथिलपदं परिक्रामन्ति ।]

राजा— तत् कथं परिक्रमामि ।

मम हि दहति गात्रं गात्रमन्तर्दवाग्नि-
    र्दळति हृदयबन्धश्चेतना मीलितेव ।
प्रभवति न च गन्तुं स्वप्रयाणेष्विवाङ्घ्रिः
    कथमपि बलदत्ता नीयते वागपीयम् ॥ ११ ॥

[विसंज्ञः पतति ।]

परिजनः— अहो प्रमादः । [उपवीज्य] यदि जीवति गृहीत-हस्तावलम्बनं प्रापयामि । [वीजयति ।]

राजा— [किञ्चित्संज्ञां लब्ध्वा निरूप्य] कुत्र वयम् ।

परिजनः— [सकरुणं] ननु वयं चित्रवनोपकण्ठे ।

राजा— किमत्रैव सा प्रतिपालयति मां विस्रम्भजल्पिताय ।

विदूषकः— [आत्मगतम्] अये उम्मादो विअ । (अये उन्माद इव ।) [परिजनः परस्परेषां मुखमवलोकयति ।]

चतुरिका—[आत्मगतं] किं एत्थ पडिवज्जेमि । [प्रकाशं] णं भट्टु सा किच्चाए [इत्यर्धोक्ते] किमत्र प्रतिपद्येत । ननु भर्तः सा कृत्यया)

राजा— तत् किमत्र वयमानीताः ।

चतुरिका— भट्ट ! णं देवीणिअंतणेण एत्थ ठिदाए एदाए सरीरं वि दाव पेक्खिस्सं ति । (भर्तः ! ननु देवीनियन्त्रणेनात्र स्थितायाः एतस्याः शरीरमपि तावद् द्रक्ष्यामीति ।)

राजा— [सानुस्मरणं] अहो ! कथमस्माकमविनयः । यद् देव्याः सन्देशमन्तरेण तन्नियन्त्रितामात्मना द्रष्टुमध्यवसिताः ।

चतुरिका— [आत्मगतं] अह्रो ! णिच्चळाणुराअदा । हा वसुमइ ! तुह उण णत्थि ईरिसं सोभग्गं । (अहो ! निश्चलानुगता । हा वसुमति ! तव पुनर्नास्तीदृशं सौभाग्यम् ।)

परिजनः— ईदृशः खलु गुणैकनिधिर्न मृष्यते दैवेन ।

[कञ्चुकिनानुगम्यमाना प्रविश्यापटाक्षेपेण[1] देवी सौरस्ताङ्के निपत्य ।]

देवी— हा हदह्मि । पडिहदो मे उज्जमो– एदं दाऊण अय्यउत्तस्स पिअदमा होमि त्ति । कहिं दाव अय्यउत्तो । [उपसृत्य]अय्यउत्त ! किं भणामि । ठिओ अपजसो जं बहिणीमुहेण पोम्मावई सपत्तिं णासिअवइ त्ति । जं सच्चं उरं विदारिअ दंसेमि । तह वि को एत्थ वीससदु । (हा हतास्मि । प्रतिहतो म उद्यमः– एतां दत्त्वा आर्यपुत्रस्य प्रियतमा भवामीति । कुत्र तावदार्यपुत्रः । आर्यपुत्र ! किं भणामि । स्थितमपयशो यद् भगिनीमुखेन पद्मावती सपत्नीं नाशितवतीति । यत्सत्यमुरो विदार्य दर्शयामि । तथापि कोऽत्र विश्वसितु ।)

राजा— कातरे ! का त्वमत्र । ननु त्वया दातुमेव सा मह्यमध्यवसिता । मया पुनर्मन्दभाग्येन मृत्यवे दत्ता ।

---

1. 'इय पटा' ख.

चतुरिका— उट्ठेदु भट्टा । पेक्खिस्सं दाव किच्चाभक्खिअसेसं वि से सरीरं । (उत्तिष्ठतु भर्ता ! द्रक्ष्यामि तावत् कृत्याभक्षितशेषमप्यस्याः शरीरम् ।)

[राजा देव्या दत्तहस्तावलम्बः शनैः शनैः परिक्रामति ।]

विदूषकः— अह्मो! महासप्पो । [उत्प्लुत्य पतति ।] (अहो! महासर्पः ।)

[ततः प्रविशति विकीर्णावयवापि वेष्टमाना स्त्री ।]

राजा— [निर्वर्ण्य] हहा तदेतत् । [आदाय चक्षुषोर्निधाय]

एवंगतेऽप्यतृप्तैर्नयनैरिव मे मधुव्रतैः पिहिता ।
कुसुमानि वासयन्ती प्रिया प्रियाया इयं वेणिः ॥ १२ ॥

[आत्मगतं- देवीं वीक्ष्य] उपरतः किं न कथयामि । [प्रकाशं]

अश्रान्तमेकरसया प्रियताडनस्य
सन्ताडिनी न मम या विहिता त्वयाभूत् ।
यन्मण्डनैकरसिको मम पाणिरेष-
स्तामेव वीक्ष्य न कथं शतधा विदीर्येः ॥ १३ ॥

देवी— [आत्मगतं] णिट्ठुरो विअ ववसाओ अय्यउत्तस्स । कंपिदह्मि । (निष्ठुर इव व्यवसाय आर्यपुत्रस्य । कम्पितास्मि ।) [प्रकाशं-अञ्जलिं कृत्वा] भट्ट! एत्थ दाव । (भर्तः! अत्र तावत् ।)

राजा— कृतार्थय त्वमप्यात्मानम् । [समर्पयति ।]

चतुरिका— [गृहीत्वा सास्रम्] हा वसुमइ! एदावसेसदंसणा कहिं सि मे संवुत्ता । कठिणे जाळावइ! किं तुए कअं । (हा वसुमति!

एतावच्छेषदर्शना कुत्रासि मे संवृत्ता । कठिने ज्वालायति ! किं त्वया कृतम् ।)

परिजनः— पापे ज्वालावत्येमासि ।

यत् प्रत्यक्षं मुहुरुपकृता चोररक्षादिभिस्तै-
स्तज्जानीषे न यदि भवतु प्रायशः के कृतज्ञाः ।
पौत्रीमेवं शिव शिव कथं शान्तमन्यां च कन्यां
न क्वेत्रास्मिन् जगति शृणुमः कृत्यया मारितेति ॥ १४ ॥

राजा— कृतं पापमनुस्मृत्य ।

देवी— तुए सह पसूदा किंति ण मइ । (त्वया सह प्रसूता किमिति न म्रिये ।)

चतुरिका— एत्थ दाव भवं । (अत्र तावद् भवान् ।)

राजा— [उपसृत्य] हह ! कथमेवमपि न मां नन्दयति ।

छिन्ना वेणी क्वचिदपहृतो भक्षितो वाग्रहस्तो
वक्षश्छिन्नं दृढकुचयुगाक्रान्तमप्यन्तराळे ।
छिन्नो मध्यश्छिदुरबिसिनीसूत्रसूक्ष्मः प्रकृत्या

[निपुणं विभाव्य]

पादावस्याः सविधशिथिलौ प्रत्यगग्राङ्गुलीकौ ॥ १५ ॥

देवी— किं णेदं पिसाजिणं विअ । (किन्न्वेतत् पिशाचीनामिव ।)

राजा— मा मैवम् । कृत्यया प्रियतमां भ्रामयित्वाभिहन्तुमवलम्बितावग्रचरणौ सुकुमारतया नूनमावर्तिताग्रौ । तद्यथापुरमवस्थापयामि । [आदत्ते ।]

परिजनः— विशेषज्ञ ! गतजीवं शरीरं न स्पृश्यताम् ।

राजा— [सकोपदैन्यं] अद्य चित्रसेनस्य वसुमतीचरणारविन्द-स्पर्शोऽपि न क्षम्यते भवद्भिः । अपेत । अथवा क्षणमात्रमेतत् । अनन्तरं तु मय्यप्येवंदशां गते कमपरं भवन्तः शिक्षयन्तु । तदकृत्रिम-स्नेहरसाद्रतेन हृदयेन यथाभिलाषमालपन्तु ।

परिजनः— [स्वगतं] प्रत्यग्रवैशसदीप्यमानहृदयस्य प्रकृष्य-माणशोकाविस्मृतेतिकर्तव्यताकस्य निश्चितनिजात्ययशिथिलीकृतप्राभ-वाहङ्कारस्य कोऽप्ययमतिगभीरनिष्ठुरोऽस्य वागुपन्यासः । तदनव-सरोऽयमस्मादृशजनवचनस्य । अपसरामस्तावत् । [अपसृत्य तिष्ठन्ति ।]

राजा— अहो तावत् । [यथापूर्वं चरणौ चिकीर्षन्] अये! कथ-मेतत् ।

बलादाकृष्यमाणावप्यन्यथैवावतिष्ठतः ।
न च स्पर्शे सुखं तावन्मृदुतापि न तादृशी ॥ १६ ॥

देवी— अय्यउत्त! (आर्यपुत्र!)

राजा— देवि! स्वागतम् । [पुनः सानुस्मरणं सलज्जमात्मगतं] अये! प्रागेवेयमागता । [प्रकाशं] किं विवक्षसि ।

देवी[1]— [आत्मगतं] अय्यउत्तं उम्मादो विअ अवक्खंदइ । हा हदह्मि । [प्रकाशं] गअजीवं सरीरं दुराणमं पकिदिगुणसुण्णं अ होइ । (आर्यपुत्रमुन्माद इवावस्कन्दते । हा हतास्मि । गतजीवं शरीरं दुरानमं प्रकृतिगुणशून्यं च भवति ।)

राजा— अस्त्येतत् ।

---

१. 'देवी अय्य' ख

चतुरिका— सजीवो विअ से मुहपुण्णचंदो । (सजीव इवास्य मुखपूर्णचन्द्रः ।)

राजा— [निरूप्य] अथ दिष्ट्या वर्धसे ।

चतुरिका— को उण दाणिं आसासो। (कः पुनरिदानीमाश्वासः।)

राजा— ननु शक्यमनया सहाद्य नः प्रस्थातुम् । न च दूरगतेयमित्यनुतप्तव्यमस्माभिः ।

चतुरिका— अत्थि एदं । (अस्त्येतत् ।)

राजा— तत् किं प्रियवल्लभामस्मत्प्रतिपालिकां न परिष्वज्जे प्रियाम् ।

चतुरिका— हुं साहसं । दूसहाआसदाइणी खु मरणवेअणा होइ । अज्ज विसेसदो अणुपरिसो वि मेरुव्व पडिहाइ । ता से मरणं पडिवाळेहि । (हुं साहसम् । दुर्वहायासदायिनी खलु मरणवेदना भवति । अद्य विशेषतोऽणुस्पर्शोऽपि मेरुवत् प्रतिभाति । तस्मादस्या मरणं प्रतिपालय ।)

राजा— हहह! चित्रसेन मन्दभाग्य! दारुणः खल्वसि । यत् प्रियतमाया मरणमेव प्रतिपालयसि ।

देवी— चउरिए! हिअअकंपणं मंतेसि । (चतुरिके! हृदयकम्पनं मन्त्रयसे ।)

---

१. 'यमनु' ख.

राजा—

वेष्टमानां महीपृष्ठे पांसुरक्तावकुण्ठिताम् ।
पश्यन् प्रियतमामेवं पाटये किं न मे दृशौ ॥ १७ ॥

[हस्तेन दृशौ पृशति ।]

देवी— [ससंभ्रमं हस्तौ गृहीत्वा] अविहा अविहा! अय्यउत्त! अप्पाणं पय्यवत्थावेहि। (अपिहा अपिहा! आर्यपुत्र! आत्मानं पर्यवस्थापय।) [पादयोः पतति]

राजा— आज्ञाकिङ्करेऽपि दासजने किं प्रसादनायासेन। यद्येवं मया विरम्यते।

देवी— [आत्मगतं] पणअबहुमाणसोअविह्मआवेसमंथरो[1] से चित्तभेदो। ता अदिणिब्बंधं ण करेमि। (प्रणयबहुमानशोकविस्मयावेशमन्थरोऽस्य चित्तभेदः। तस्मादतिनिर्बन्धं न करोमि।)

राजा— चतुरिके! किं परिरम्भणमपि न क्षम्यते।

उद्भ्रान्ततारकमुपश्रयदक्षि यच्च
कण्ठे परिस्खलति निःश्वसितं निरुद्धम्।
तत् पश्यतो न खलु शाम्यति मन्युरुग्रः
पश्चात् प्रियामरणतस्त्यजतोऽप्यसून् मे ॥ १८ ॥

तदद्यैव कारीषेण वह्निना कलेबरं व्यापादयामि। अथवा पापमिदमनर्हमग्निसंस्कारस्य। कः कोऽत्र भोः। अस्ति कश्चिदत्र सन्निहितो रज्जुः अथवा कथं याच्ञादैन्यमनुभवामि। [उत्तिष्ठति।]

---

१. 'देवी-पणअ' ख.

सर्वे— [सभयशोकनिर्वेदसम्भ्रमं] हहह! किमेतत् ।

श्रुतं क्षमा धैर्यमपि त्वयि स्थितं त्वया विनेयः पुनरीदृशो जनः ।
स्थितिं निजां संत्यजतः कथं पुनर्भवेन्निषेद्धा तव वार्णवस्य वा ॥१९॥

[मार्गमावृत्य पादयोः पतन्ति ।]

[पटाक्षेपेण प्रविश्य संभ्रान्ताः प्रकृतयः]

प्रकृतयः—

यस्मिन् न जातु बन्ध्या नः प्रार्थना त्वयि गोप्तरि ।

राजा— स गतो धन्यजन्मा चित्रसेनः। अयं पुनरपूर्वः स्वदार-रक्षणेऽप्यकुशलः पातकी चित्रसेनः। तदाज्ञाय त्वरितमाज्ञापयथ ।

प्रकृतयः— [आत्मगतं] अतिभूमिं गतो विषादशङ्कुः। तथापि तावत् [प्रकाशं]

तं प्रार्थयामहेऽद्य त्वां विरमाधर्मसाहसात् ॥ २० ॥

सुनीतिः— [आत्मगतम्] कथमनार्यमाशंसते देवः। [प्रकाशं] देव! विरहः खलु दुःसहः ।

राजा— अथ किम् ।

सुनीतिः— तत्कथं जीवन्तीमपहाय दूरयात्रायामुद्यमः ।

राजा— इदमुचितम्। यावदस्याः प्राणप्रहाणं प्रतीक्षिष्ये। [उपविशति। निर्वर्ण्य] अहो रुधिरानुलेपगृध्नवः संपतन्ति कथमस्यां पिपीलिकाः। तत्कथमस्पृशन्निमां निवारयाम्यमूः । [वसनाञ्चलेन शनै-

बीरणमभिनीय] हन्त! कथं नापत्रपा ते।

आच्छिद्य प्रसभं प्रियां हृदयमप्युद्धाट्य यस्याः पपा-
वास्रं तत्र न नाम किञ्चन कृतं येन स्वयं धन्विना।
सोऽहं पापमतिर्निकामकृपणः पश्यन्निति प्रेयसीं
संदष्टासि पिपीलिकाभिरिति तु क्रूरो दधानो दयाम् ॥ २१ ॥

चतुरिका— भट्ट! भूइट्ठं तुज्झ उवरि दिण्णदिट्ठी मे पिअसही। (भर्तः! भूयिष्ठं तवोपरि दत्तदृष्टिर्मे प्रियसखी।)

देवी— दारुणे! किं सल्लघट्टणं कुणेसि पुणा पुणा अय्यउत्तस्स। (दारुणे! किं शल्यघट्टनं करोषि पुनः पुनरार्यपुत्रस्य।)

[सर्वे तां तर्जयन्ति।]

राजा— वयस्ये! किं पापे मयि वृथानुकम्पसे। तदपि न क्षम्यते लोकैः, अथवा दैवेन। तथापि तावदेकवारकटाक्षलक्षितश्चरितार्थमात्मानं समर्थये यदत्र लोके पुनर्दुर्लभम्। [दक्षिणाक्षिस्पन्दमभिनीय] कथमेतत्। अथवा कटाक्षपातगोचरो भवेत्याह। भवतु। [तथा कृत्वा सहर्षं] कथमद्यापि सानुरागमिवाक्षिवलनम्। नन्वेतदन्तं चित्रसेनस्य वसुमतीसमागमस्य विलोकनफलम्। अथवा लोचनयोः। अथवा ममैव। अथवा धातुर्निर्माणस्य। अथवा सर्वलोकस्य।

चतुरिका— हहह! विअडवित्थारिदाणणाए विवसणिप्फंदणिवेसिअसअलंगलट्ठीए मुहादो णिग्गदा पाणा से। अहव मम। अहव अम्हाणं। (हहह! विकटविस्तारिताननाया विवशनिष्पन्दनिवेशितसकलाङ्गयष्टेर्मुखान्निर्गताः प्राणा अस्याः। अथवा मम। अथवा अस्माकम्।)

राजा— [सबाष्पगद्गदं]

अद्य प्राणाः शिखरिगुरवो गात्रबन्धे मदीये
यद्वा गात्रं शिखरिगुरु मे भूतलस्यास्य पापम् ।
यद्वा पृथ्वीतलमपि तथा यत्र सा नास्ति बाला
द्यौरेवाद्यप्रभृति कृतिनी यत्र सा प्रेयसी मे ॥ २२ ॥

चेतस्तावत् प्रणयमसृणं बुद्धिमत्यन्तमृज्वी-
माचारं च स्थिरमकृतकप्रेमभक्तिप्रधानम् ।
तद्वा वक्त्रं प्रकृतिमधुरस्मेरमाकेकराक्षं
क्वायं पापः कलयतु पुनर्भूतले हेयजन्मा ॥ २३ ॥

किञ्च,

विरतमधुना बाले! विस्रम्भभाषितकौतुकै-
र्विरतमथवा सर्वोद्योगैर्मयापि विरम्यते ।
प्रकृतिकठिना तत्किं कृत्या न मां नयतेऽथवा

[सानुस्मरणं] अस्माकमप्रियकारिणी खलु सा कथं स्वयमिदमनु-मन्यताम् । तत् प्रार्थये तावदेनाम्—

प्रकृतिलंलित[1](कृत्ये!) तुभ्यं नमो नय मामपि ॥ २४ ॥

अयि कृत्ये! यावदस्मा न जीर्यति त्वया पीतमास्रं तावन्ममापि पिब । येन ते वा सुखमनुभवताम् । अथवा सम्यक् स्फुरितम् । याव-दिमामङ्गेनाङ्गमालिङ्गामि । [तामालिङ्ग्य] अये पश्चिमस्ते परिष्वङ्गः । [मूर्च्छति ।]

[स्त्रियः सर्वा एव सोरस्ताडं रुदन्ति ।]

१. 'लुलिते' ख.

सुनीतिः— देव! समाश्वस समाश्वस। कथमद्यापि नोच्छ्वसिति। [उपसृत्य] शिशिरोपचारविधिं तावदाचरन्तु भवत्यः।

देवी— तह। (तथा।) [तथा करोति देवी परिजनश्च।]

सुनीतिः— कथमद्यापि नोच्छ्वसिति। कष्टं भोः! उच्छ्वसनमपि दुष्करम्। यदि जीवति। तदिदं मया कृतं वसुमतीमिहानयता।

आसीकृतो मलयकेतुरसौ निकामं
खात्वा महीं वसुमतीं च मयोपनीताम्।
तच्छ्रेयसे प्रभव इत्यधुनापि मन्ये
को वेद दैवमधरोत्तरमातनोति॥ २५॥

अयि भोः! अद्यापि नोच्छ्वसिति। मया नाम मनुष्यमात्रेण न हितमाचरितम्। सत्यसन्धः प्रत्यक्षमुपाक्रियमाणः स भगवान् महेन्द्रः प्रत्यङ्गिरसमादेक्ष्ये इत्यभिधाय कथमुदास्ते। अथवा प्राभवमेवं विकारयति। तत्किमिदानीं कृपणस्तस्य प्रतिकरोमि।

चतुरिका— दाणिं ईसि ऊससइ। (इदानीमीषदुच्छ्वसिति।)

सुनीतिः— अयि देवः।

चतुरिका— णहि णहि। सा मे पिअसही। (नहि नहि। सा मे प्रियसखी।)

सुनीतिः— [वैचित्यं नाटयन्] सा नासंहृत्य देवं मरिष्यति। *...... तत्किमित्यात्मानं धारयामि।

चतुरिका— हा हा मरणं एव्व गआ। [मूर्च्छति] (हा हा मरणमेव गता।)

---

* अत्र किञ्चिल्लुप्तं भाति।

विदूषकः— अविहा अविहा! परित्ताअहि मं। (अपिहा अपिहा! परित्रायस्व माम्।)

सुनीतिः— मूर्ख! तव किम्।

विदूषकः— किं वि भूअं आलिङ्गइ वअस्सो। (किमपि भूतमालिङ्गति वयस्यः।)

सुनीतिः— [निर्वर्ण्य सानन्दमुत्थाय उच्चैः] भो देव! दिष्ट्या वर्धसे। विसृज पिशाचिकाम्। विसृज पिशाचिकाम्।

[राजा चतुरिका च प्रत्यागच्छतः।]

राजा— [सरोषं] क आह पिशाचिकामिति।

सुनीतिः— नन्वहम्। पश्यतु देवः परिष्वक्ताम्।

राजा— [निरूप्य] धिक्! प्रमादः। [अपसृत्य परिजनं प्रति] अपनीयतामियम्। [परिजनो निष्कामयति।]

राजा— दिष्ट्या दिष्ट्या। [विमृश्य] कथमेतत्। इदमेव तावदाश्चर्यम्।

[नेपथ्ये]

किमेतदाश्चर्यम्।

राजा— कथयतु महाभागः।

[पुनर्नेपथ्ये]

किमत्र मया कथ्यते। कथयिष्यति कुमारो वीरसेनः।

[प्रविश्य वीरसेनः]

वीरसेनः— आज्ञप्तोऽस्मि भगवता दिवस्पतिना– झटित्युपेत्य पितरावाश्वासय इति । [उपसृत्य] जयत्वार्यः ।

[पादयोः पतति ।]

राजा— [सस्नेहं परिष्वज्य मूर्ध्न्युपाघ्राय] दिष्टया कुशलिनं त्वां पश्यामि । अपि न शक्रः प्रत्याङ्गिरसमादिष्टवान् ।

कुमारः— ननु स तेनादिष्टः कृत्यां बहुधा छिन्नां कण्ठगतप्राणां च लुण्ठ तावदिति विसृज्य पुनर्दिवं गतः ।

सुनीतिः— व्यक्तम् । अन्यत् ।

राजा— किमिव ।

सुनीतिः[1]— सा किल कण्ठस्थजीवनापि यावज्जीवसुलभमायाविनी वसुमतीरूपमवलम्ब्य सर्वानस्मान् वञ्चयन्त्यासीत् ।

राजा— अस्त्येतद् । यावज्जीवं मायाविनो मायाभिर्वञ्चयन्ति, ततः प्रकृतिरूपा भवन्तीति ।

चतुरिका— पिअसही उण कहिं । (प्रियसखी पुनः कुत्र ।)

राजा— इदं तु न ज्ञायते ।

सुनीतिः— [ऊर्ध्वमवलोक्य] किमेतत् ।

---

१. 'तिः– कण्ठ' ख.

राजा—

आयाति भानुबिम्बं नहि नहि दिव्यं विमानमिदम् ।

[पुनर्वीक्ष्य]

तत्र सुरा अप्सरसो वसुमत्येवात्र सपरिवारा ॥ २६ ॥

सुनीतिः— तद् भद्रासनमासाद्य सम्भावयत्वमूं देवः ।

राजा— यथा रोचते । [पश्यति । सर्वे परिक्रामन्ति ।]

राजा—

चेतः प्रसीदति यदुन्मिषति प्रहर्षः
प्रज्ञा विशुद्ध्यति न कश्चन शोकशूकः ।
सुप्त्वा प्रबुद्ध इव न व्यसनानि वृत्ता-
न्यद्य अयामि शुभमेव तु वर्धमानम् ॥ २७ ॥

प्रतीहारी— एदं भद्दपीढं । (एतद्भद्रपीठम् ।) [राजा उपविश्य पश्यति । सर्वे यथार्हमुपविशन्ति ।] [ततः प्रविशति वसुमतीं पुरस्कृत्य शान्तिमान् ज्वालावती च सपरिवारः । राजा उत्थाय आसनमुपवेशयति । सर्वे यथार्हमुपविशन्ति ।]

शान्तिमान्— वत्से! इत इतः । [वसुमती उपसर्पति । शान्तिमानङ्के कृत्वा मुखमुन्नमय्य] अयि वत्से! अपि पद्मावती विदिता ।

वसुमती— णहि णहि । (नहि नहि ।)

शान्तिमान्— तत् प्रणम । [वसुमती वन्दते ।]

देवी— एह्येहि । (आलिङ्ग्याङ्केन गृह्णाति ।)

राजा— कथमत्रभवन्तमियं प्राप्ता ।

शान्तिमान्— श्रूयतां तावदामूलम् । तज्ज्ञायत एव यदस्या मया लोकोत्तरं वरमुद्दिश्य प्रयागे तपः प्रारब्धम् ।[1]

राजा— श्रुतपूर्वमिदम् । ततः ।

शान्तिमान्— तत्र मदाश्रमोद्देशे[2] निवासिनी कापि कराळी नाम पिशाचिका तपस्येधमाने वित्रस्ता विद्रुता कुपिता च । या ज्वालावतीमाविश्याद्य कृत्योत्पादनान्तं मदप्रियाय चेष्टितवती ।

राजा— इदानीं तु

शान्तिमान्— पराभूता ।

राजा— प्रियं नः ।

सर्वे— निर्दोषा ज्वालावती ।

चतुरिका— दिट्ठिआ वड्ढेमो । [वसुमतीमालिङ्गति] (दिष्ट्या वर्धामहे ।)

राजा— ततस्ततः ।

शान्तिमान्— पूर्वमेव सा तादृशाय वराय प्रदिष्टा आभिरिति

१. ' प आरब्धम् ' क. २. ' शनिवा ' ख.

भगवतो भवानीपतेरासाद्य वरं निरतिशयानन्दमन्थरो यावदहम् ।

राजा— किं तावत् ।

शान्तिमान्— अस्मदमात्येन रैवतकेन प्रेषितं कुत्रेति न ज्ञायते कन्यकेति विज्ञापनलेखमनुवाच्य कमप्यन्यमुपायमपश्यन् कन्यकावाप्तयेऽहमाकर्षविद्यां मनस्याहितवान् ।

सुनीतिः— व्यक्तमन्यत् ।

राजा[1]— अहो दैवस्यानुकूलता

आपदं महतीं भिन्ते विभिन्ते मनसो व्यथाम् ।
कथमप्यर्थमप्राप्यमासादयति तत्क्षणात् ॥ २८ ॥

सुनीतिः— नन्विदानीं वसुमतीम् ।

शान्तिमान्— यदि देव्यै रोचते ।

देवी— मए उण दत्तपुव्वा । (मया पुनर्दत्तपूर्वा ।)

शान्तिमान्— यद्येवं कः पुनरत्राहम् ।

चतुरिका— पहवइ एत्थ पम्मावई । (प्रभवत्यत्र पद्मावती ।)

राजा— तर्हि कृतार्थः खल्वहम् । [सलज्जस्तिष्ठति ।]

शान्तिमान्— स्वयमहं च किं ते प्रियमुपहरामि ।

---

१. 'जा— दैवस्य' ख.

राजा— किमितोऽपि प्रियमस्ति । तथाप्येतत्—

पन्थानः कविराजराजचरिताः सन्त्वद्य घण्टापथाः
काव्ये मत्सरिदूषितेऽपि लभतामानन्दमद्योर्जितम् ।
श्रद्धामद्य च सर्वलोकहिततां जानन्तु देव्या गिरां
व्युत्पन्नास्तु भवन्तु वा ननु ततः सर्वं च भाग्यं स्थितम् ॥२९॥

विद्यास्थानेषु सर्वेष्वपि गुरुपदवीं नाटकान्ते च काव्ये
निर्मातृत्वं विवादे प्रतिकथकमुखस्तम्भमुख्याधिकारम् ।
... ...
... ...

पञ्चमोऽङ्कः समाप्तः ॥